Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ अथ रुद्रविधानपद्धतिप्रारम्भः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीगणेशाय नमः ॥ ॥ भवानीशंकरौनत्वापाढुलांकुलदेवताम् ॥ गुरुंगणपतिंचैव
भारद्वाजादिकान्मुनीन् ॥ १ ॥ गङ्गाधरोवितनुतेश्रीरुद्रार्चनपद्धतिम् ॥ कर्मणोगुरु
संज्ञस्यपर्शुराममतानुगाम् ॥ २ ॥ ॥ तत्रादौ मुहूर्त्तविचारः ॥ संग्रहवाक्यं ॥ वैशाखे
श्रावणेमासिआश्विनेमार्गशीर्षके ॥ माघफाल्गुनयोर्वापिसितपक्षेशुभेहनीति ॥ १ ॥
अनध्यायतिथिंरिक्तांतथाषष्ठींविहायतु ॥ इतरासुप्रकर्तव्योरुद्रारंभोयथोदितः॥ २ ॥
नानध्यायेनसंध्यायांनापराह्णेकथंचन॥स्त्रियां रजस्वलायांचमंत्रारंभोनसिद्धिदइति॥
प्रारब्धजपमध्येथानध्यायादियदापतेत् ॥ तदायंनिर्णयोज्ञेयः पुराणपुरुषोदितः ॥
अल्पंजपेदनध्यायेप्रदोषेऽल्पतरंजपेत् ॥ वेदांश्चैवतथारुद्रान्स्वाध्यायेकेवलेजपेत् ॥
मासादीनांनिषेधोयंकेषांचिन्नैवसम्मतः ॥ यदैवजायतेवित्तंचित्तंश्रद्धासमान्वितम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदैवपुण्यकालोयंयतोऽनित्यंहिजीवितम् ॥ अतःसर्वेषुकालेषुजपस्यारंभणंशुभम् ॥
॥ अथकात्यायनपरशुरामाद्यनेकविद्वत्कृतरुद्रविधानान्यवलोक्याऽधिकारिजनसु
बोधनायप्रातरुत्थानादियथाकालोचितकर्मानुरूपेतिकर्त्तव्यतोच्यते ॥ तत्रश्रीरुद्रा
नुष्ठानंनित्यकाम्यनैमित्तिकादिभेदैर्यजमानमनोनुरूपतयात्रिधाभवति ॥ तत्रनि
त्योरुद्रजपोब्राह्मणस्यज्ञातव्यः ॥ एवं मानांश्चरुद्रांश्चस्वाध्यायेकेवलेजपेदितिवच
नात् ॥ मोक्षार्थीतुयावज्जीवंपाशुपतादिव्रतीनित्यंरुद्रं जपेदित्यादिवाक्याच्च ॥ अथ
काम्यः ॥ ॥ धर्मार्थकाममोक्षसिद्धिकामोब्राह्मणोऽन्योवाकश्चिद्द्विजातिः पुत्रधना
दिकामोयथाशास्त्रोक्तपाशुपतादिव्रतयुक्तोरुद्राध्यायंजपेत् ॥ तस्यश्रुतिस्मृत्यादि
प्रसिद्धप्रभावत्वात् ॥ इतिकाम्यः ॥ ॥ अथनैमित्तिकः ॥ ॥ महापातकोपपातकादि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संसर्गादिजनितदुष्कृतपरिहारार्थमनेकस्मृत्युक्तप्रायश्चित्ताद्यनेकनिमित्तेष्वेकमुद्दि
श्य यो विधीयतेरुद्रजपःसनैमित्तिकः ॥ तत्रकाम्यनैमित्तिकरुद्रानुष्ठानेयथाशास्त्रवि
हितव्रतंयथाशक्त्यनुसारेण यथाकालानुरूपंयथादेशानुसारंयथापार्श्वस्थजनानुरू
पंचरेत् ॥ नित्यजपेतुयदृच्छया चरेत् ॥ मोक्षार्थीतुयावज्जीवंव्रतीभूत्वावारुद्रंजपेत् ॥
अथवाआत्मनोमनोवाक्कायशुद्धिंसंपाद्यजपेत् ॥ काम्येतुरुद्राध्यायरुद्रैकादशिनी
रुद्रमहारुद्रादिरूपांकांचित्संख्यामवधिंविधाय कंचिदपि कालंवावधिंविधायब्रह्मचर्य
हविष्यान्नाशनैकभक्तादियथाशक्तिव्रतयुक्तोजपेत् ॥ एवंनैमित्तिकरुद्रानुष्ठानेपिज्ञात
व्यम् ॥ एवंरुद्रजपंकुर्वन्पुरुषः कृतकृत्योभवतिसर्वपापैःप्रमुच्यतेसर्वान्कामा
नवाप्नोतीत्याहभगवान्कात्यायनः ॥ ॥ अथ कर्त्तायथाधिकारंसपत्नीकोऽपत्नीको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाज्योतिःशास्त्रोक्तकालेकृच्छ्रचांद्रायणकूष्मांडहोमादिभिःसंशुद्धः कृतनित्यक्रियः
कर्मांगस्नातोधौतेअहतेनवीनेशुक्लेवाससीपरिधाय बद्धशिखःकृतभस्मतिलको
धृतरुद्राक्षःपवित्रपाणिर्धृतकुशोपग्रहोयथाधिकारंकृतवैश्वदेवःकुशाद्यासनेंतर्जानुःप्रा
ङ्मुखोपविष्टःकृतकर्मांगाचमनः कृतप्राणायामःसुमुखश्चैकदंतश्चेत्यादिहृदयस्थो
जनार्दन इत्यंतमुक्त्वात्रिर्विष्णुकीर्त्तनपूर्वकमोमद्येत्यादिगोत्रोच्चारेणाऽमुकगोत्रो
त्पन्नस्य मम श्रीरुद्रप्रसादात् पापक्षयव्याधिमोचनापुत्रत्वनिदानप्रत्यवायापूर्व
निवृत्तिबहुजीवनश्रीशांतिपुष्टितुष्टिपुत्रमोक्षादीनामभिलषितस्यामुककामोऽमुकानि
मित्तेवाश्रीरुद्रप्रीत्यर्थममुकरुद्रेण श्रीसदाशिवमहंयक्ष्ये ॥ ततश्चिकीर्षितस्यामुक
रुद्रानुष्ठानस्याविघ्नसमाप्त्यर्थं गणपतिपूजनमहंकरिष्ये ॥ इति संकल्पंकुर्यात् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततोऽक्षतादिभिःकृतेष्टदलेनिहितायांमूर्त्तौअथवाशुभकौसुंभसूत्रवेष्टितेपूगफलेप्रति
ष्ठामंत्रैः प्रतिष्ठाप्यदेवंपूजयेत् ॥ ॐगणानांत्वागणपति ᳪ हवामहेप्रियाणांत्वा
प्रियपति ᳪ हवामहे निधीनांत्वानिधिपति ᳪ हवामहेवसो ममआहमजानिगर्भधमा
त्वमजासिगर्भधम्. ॥ १ ॥ भगवन्गणपते एतत्ते आवाहनम् ॥ १ ॥ गणानां० ॥ भ
ग० एतत्तेआसनम् ॥ २ ॥ गणानां० ॥ भग० एतत्ते पाद्यं ॥ ३ ॥ गणानां० भग० ॥
एषतेऽर्घः ॥ ४ ॥ गणानां० ॥ भग० एतत्ते आचमनीयम् ॥५॥ गणानां० ॥ भग० एष
तेऽभिषेकः ॥६॥ आचमनं ॥ गणानां० ॥ भग० एतत्तेवस्त्रयुग्मं ॥ ७ ॥ आचमनं ॥
गणानां० ॥ भगव० एतत्तउपवीतम् आचमनम् ॥ ८ ॥ गणानां० ॥ भग० ए
तत्तेऽनुलेपनम् ॥ ९ ॥ गणानां० ॥ भग० एतानितेदूर्वाशमीयुतपुष्पाणि ॥ १० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गणानां० ॥ भग० एषतेधूपः ॥ ११ ॥ गणानां० ॥ भग० एषतेदीपः ॥ १२ ॥ ग
णानां० ॥ भग० एतत्तेनैवेद्यं ॥ १३ ॥ आचमनं ॥ गणानां० ॥ भग० ॥ प्रदक्षि
णाः ॥ १४ ॥ गणानां० ॥ भग० ॥ एषतेऽष्टांगः प्रणामः ॥ १५ ॥ गणानां०
॥ भग० ॥ एषाते दक्षिणा ॥ १६ ॥ ततःफलार्घः ॥ गणानांत्वा० ॥ रक्षरक्षग
णाध्यक्षत्र्यक्षत्रैलोक्यरक्षक ॥ भक्तानामभयंकर्त्तात्राताभवभवार्णवात् ॥ द्वैमातुर
कृपासिंधोषाण्मातुराग्रजाग्रज ॥ वरदत्वंवरंदेहिवांछितंवांछितार्थद ॥ अनेनफ
लदानेनफलदोस्तुसदामम ॥ भगवन्गणपतेएतत्तेगंधाक्षतार्चितं नारिकेलफलम्
॥ ॥ इतिसंपूज्य ॥ ॥ हस्तौसंयोज्य ॥ दीनानाथदयानिधेसुरगणैः संसेव्यमानद्विज
ब्रह्मेशानमहेंद्रशेषगिरिजागंधर्वसिद्धैःस्तुत ॥ सर्वारिष्टनिवारणैकनिपुणत्रैलोक्यना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

थप्रभो भक्तिं मेसकलांकुरुष्वसफलांक्षांत्वापराधान्मम ॥ १ ॥ इत्याशास्यप्रणमे
त् ॥ ततःकरेजलंकृत्वाऽद्यात्रआवाहनादिफलार्घपर्यंतार्पितषोडशोपचारोपचित
यापरिचर्ययाभगवान्भवानीसूनुर्गजाननः प्रीयतामितिप्रत्यर्पयेत् ॥ अत्रश्रीगणप
तिपूजनेयन्न्यूनातिरिक्तंतद्भवतांवचनाद्गणपतिप्रसादादच्छिद्रमस्तुउत्तरे कर्मण्यवि
घ्नमस्तु ॥इतिगणपतिपूजनम् ॥ १ ॥ अथपुण्याहवाचनम् ॥ ॥ कर्त्तास्वलंकृतोदर्भ
पाणिः कुशयवजलान्यादाय ओमद्येहकरिष्यमाणामुकरुद्रानुष्ठानस्य सांगतानिमि
त्तपुण्याहवाचनार्थं कलशस्थापनमहं करिष्ये ॥ तद्यथा ॥ ॐमहीद्यौःपृथिवीचनइ
मंयज्ञं मिमिक्षताम् ॥ पिपृतांनोभरीमभिः ॥ १ ॥ ॐभूरसिभूमिरस्यदितिरसिविश्व
धायाविश्वस्यभुवनस्यधर्त्री॥पृथिवींयच्छपृथिवींदृꣳहपृथिवींमामाहिꣳसीः॥२॥इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूमिंस्पृष्ट्वा तत्रतंडुलराशिं विधाय तदुपरिॐ आजिघ्रकलशंमह्यात्वाविशंत्विंदवः॥
पुनरूर्जोनिवर्त्तस्वसानः सहस्रंधुक्ष्वोरुधारापयस्वती पुनर्माविशताद्रयिः ॥ ३ ॥
इतिकलशंदृढंस्थापयेत् ॥ ततस्तत्र ॐवरुणस्योत्तंभनमसिव्वरुणस्यचस्कंभस
र्जनीस्थोव्वरुणस्यऋतसदन्यसिव्वरुणस्यऋतसदनमसिव्वरुणस्यऋतसदनमासीद
॥ ४ ॥ ॥ इतिजलं ॥ ॥ॐओषधयःसंवदंतेसोमेनसहराज्ञा॥यस्मैकृणोति ब्राह्मणस्तꣳ
राजन्पारयामसि ॥ ६ ॥ इतियवान् ॥ ॥ ॐपूर्णादर्विपरापतसुपूर्णापुनरापत ॥ वस्ने
वविक्रीणावहाइषमूर्जꣳशतक्रतो ॥ ७ ॥ ॥ इत्यक्षतान् ॥ ॥ याओषधीःपूर्वाजाता
देवेभ्यस्त्रियुगंपुरा॥ मनैनुबभ्रूणामह ꣳ शतंधामानिसप्तच ॥८॥ ॥ इतिसर्वौषधीः ॥
ॐअश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता ॥ गोभाजइत्किलासथयत्सनवथपूरुषम्॥९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ इति पंचपल्लवान् ॥ ॥ ॐकांडात्कांडात्प्ररोहंतीपरुषःपरुषस्परि ॥ एवानोदूर्वेप्रतनु
सहस्रेणशतेनच ॥ १० ॥ ॥ इतिदूर्वाः ॥ ॥ ॐयाःफलिनीर्याअफलाअपुष्पायाश्चपुष्पि
णीः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वꣳहसः ॥ ११ ॥ ॥ इतिपूगफलम् ॥ ॥ परिवाजप
तिःकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ १२ ॥ ॥ इतिपंचरत्नानि ॥
ॐहिरण्यगर्भः समवर्तताग्रेभूतस्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवींद्यामु
तेमांकस्मैदेवायहविषाविधेम ॥ ॥ १३ ॥ इतिदक्षिणाम् ॥ ॥ ॐयुवासुवासाः
परिवीतआगात्सउश्रेयान्भवतिजायमानः ॥ तंधीरासः कवयउन्नयंतिस्वाध्योम
नसादेवयंतः ॥ १४ ॥ ॥ इतिसूत्रम् ॥ ॐ सुजातोज्योतिषा सहशर्मवरूथमासद
स्वः ॥ वासोअग्नेविश्वरूप ꣳ संव्ययस्वविभावसो ॥ १५ ॥ ॥ इतिवस्त्रम् ॥ ॥ त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तः कलशं पंचपल्लवगंधाक्षतपुष्पफलैरलंकृत्य ॥ ॐ तदस्तुमित्रावरुणातदग्नेशंयो
रस्मभ्यमिदमस्तुशस्तं ॥ अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसाधनाय ॥ १ ॥
ॐ मनोर्जूतिजुषतामाज्यस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञ ठं समिमंदधातु ॥
विश्वेदेवासइहमादयंतामों ३ प्रतिष्ठ ॥ २ ॥ ॐ मनोजूतिर्जुषतामाज्यस्येतिमनसा
वाइदर्ठंसर्वमाप्तंतन्नमनसैवैतत्सर्वमाप्नोति बृहस्पतिर्यज्ञर्ठंसमिमंदधात्वितियद्विवृढं
तत्संदधातिविश्वेदेवासइहमादयंतामिदिसर्वं वैविश्वेदेवाः सर्वेणैवैतत्संदधातिसयदि
कामयेतब्रूयात्प्रतिष्ठ॥ एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनयजंतेसर्वमेव प्रतिष्ठितंभ ॥ ६ ॥
वति ॥ ३ ॥ ॥ इत्यक्षतैःप्रतिष्ठाप्य ॥ ॥ तत्र ॥ ॐ तत्त्वायामिब्रह्मणावंदमानस्तदा
शास्तेयजमानोहाविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशर्ठंसमानआयुःप्रमोषीः ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐसर्वेंसमुद्राःसरितस्तीर्थानिजलदानदाः॥ आयांत्वप्पतिनासाकंदुरितक्षयकारकाः
॥ इतिमंत्रेणवरुणादिदेवानावाह्य च ॐ वरुणादिदेवेभ्योनम इतिमंत्रेणगंधपुष्पाक्ष
तैःपूजयेत् ॥ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतस्यस्थितोब्रह्मामध्ये
मातृगणाःस्मृताः॥१॥कुक्षौतुसागराःसर्वेंसप्तद्वीपावसुंधरा॥ ऋग्वेदोथयजुर्वेदःसाम
वेदोह्यथर्वणः ॥ २ ॥ अंगैश्चसहिताः सर्वें कलशंतुसमाश्रिताः ॥ अत्रगायत्री
सावित्रीशांतिः पुष्टिकरीतथा ॥ ३ ॥ आयांतुममशांत्यर्थंदुरितक्षयकारकाः ॥
इत्येभिर्मंत्रैः कलशमभिमंत्रयेत् ॥ ततःकलशं प्रार्थयेत् ॥ यथा ॥ देवदानवसं
वादेमथ्यमानेमहोदधौ ॥ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयम् ॥ १ ॥
त्वत्तोयेसर्वतीर्थानि देवाः सर्वेत्वयिस्थिताः ॥ त्वयितिष्ठंतिभूतानित्वयिप्राणाः प्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिष्ठिताः ॥ २ ॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः ॥ आदित्यावसवो रुद्राविश्वेदेवाःसपैतृकाः ॥ ३ ॥ त्वयितिष्ठंतिसर्वेपिसर्वेकामफलप्रदाः ॥ त्वत्प्र सादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥ ४ ॥ सांनिध्यंकुरुदेवेशप्रसन्नोभव सर्वदा ॥ इति कलशंसंस्थाप्य ॥ ततउदङ्मुखांस्त्रीन्शक्त्याधिकान्ब्राह्मणान्वृणुयात् ॥ ॐ अद्य कर्तव्यामुकरुद्रानुष्ठानकार्यसांगतानिमित्तपुण्याहवाचनार्थंश्रीशिवस्यन्यासपूर्वकपू जनाद्यर्थंच नानानामगोत्रान्भवतोऽनेनतांबूलादिदानेनवृणे ॥ इतिवृत्वासं पूज्यच ॥ अभीप्सितार्थसिद्ध्यर्थं० इत्युच्चार्यचयजमानःप्राङ्मुखोऽवनिकृतजा नुमंडलः कमलमुकुलसदृशमंजलिंशिरस्याधायततोदक्षिणेनपाणिनागंधाक्षतपु ष्पपल्लवादिभूषितंसुवर्णपूर्णकलशंधारयित्वासावधानःशृणुयात् ॥ आचार्यस्ता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म्रपात्रगतगंधाक्षतपुष्पजलकुशेनयजमानाभिषेकंकुर्यात् ॥ ऋत्विजादयः पुण्याहवाचनमंत्रान्पठेयुः ॥ ततअमीवहावास्तोष्पतेविश्वारूपाण्याविशन् ॥ सखासुशेवएधिनः शिवं शिवंशिवमितिमंत्रेणतेनकलशस्थजलेनधारांकृत्वाकलशंभूमौस्थापयेत् ॥ ततोऽस्यस्वस्तिवाचनाख्यकर्मणः साद्गुण्यार्थमिमांदक्षिणांयथानामगोत्रेभ्योब्राह्मणेभ्यः संप्रददेयथाविभागंसंप्रतिगृह्यतां दक्षिणाःपांतु बहुदेयंचास्तु स्वस्तिअस्यस्वस्तिवाचनकर्मणोयन्न्यूनातिरिक्तंतत्सर्वंभवतांप्रसादादच्छिद्रमस्तुगृहेवृद्धिशतानिभवंतु उत्तरेकर्मण्यविघ्नमस्तु ॥ ॥ इतिशिष्टसंमतं स्वस्तिवाचनंकृत्वा ॥ ततःप्राङ्मुखमुपविष्टंयजमानमुदङ्मुखास्तिष्ठंतः सपल्लवदर्भपाणयो ब्राह्मणास्तत्कलशस्थजलेनैवाभिषेकंकुर्युः पौराणिकैः श्लोकैः ॥ तेयथा सुरा

२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः ॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः ॥ १ ॥
प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते ॥ आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा
॥ २ ॥ वरुणःपवनश्चैवधनाध्यक्षस्तथा शिवः ॥ ब्रह्मणासहिताः सर्वेदिक्पा
लाःपांतुतेसदा ॥ ३ ॥ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिः श्रद्धाक्रिया मतिः ॥ बुद्धिर्ल
ज्जावपुःशांतिःकांतिःसिद्धिश्चसत्तम ॥ ४ ॥ एतास्त्वामभिषिंचंतुधर्मपत्न्यः समा
गताः ॥ महाकल्पश्चकल्पश्चमन्वंतरयुगानिच ॥५॥ संवत्सराणिसर्वाणितथाचैवायन
द्वयम् ॥ ऋतवश्चतथामासाः पक्षाराव्यहनीतथा ॥ ६ ॥ संध्याश्चतिथयश्चैवमुहू
र्त्ताःकरणानिच ॥ एतेत्वामभिषिंचंतुकालस्यावयवाःशुभाः ॥ ७ ॥ आदित्यश्चं
द्रमाभौमोबुधोजीवः सितार्कजौ ॥ ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चसर्वदा ॥ ८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वायंभुवमनोःपुत्रामनुःस्वारोचिषस्तथा ॥ उत्तमस्तामसश्चैवरैवतश्चाक्षुषः पुनः
॥ ९ ॥ वैवस्वतोथसावर्णिर्दक्षब्रह्मसुतावुभौ ॥ धर्मपुत्रोरुद्रपुत्रो रौत्योभौत्यश्चवैमनुः
॥ १० ॥ एतेत्वामभिषिंचंतुमनवोवैचतुर्दश ॥ नासत्यौदेवभिषजौभवेतांविजयायते
॥ ११ ॥ धरोरुद्रश्चसोमश्च आपश्चैवानलानिलौ ॥ प्रत्यूषश्चप्रभावश्चवसवोष्टौम
हाप्रभाः ॥ १२ ॥ एतेत्वामभिषिंचंतुदेवमुख्याः समागताः ॥ धातामित्रोर्यमापूषाश
क्रेशौवरुणो भगः ॥ १३ ॥ त्वष्टाविवस्वान्सविताविष्णुर्द्वादशमस्तथा ॥ एतेत्वा
मभिषिंचंतुकश्यपादितिसंभवाः ॥ १४ ॥ ॥ इत्यभिषेकः ॥ ॥ ततआचार्यादीनांव
रणं॥सुमुखश्चैकदंत०॥ ॐ अद्येत्यादिगो० अमुकगोत्रोत्पन्नस्यममयजमानस्यसकल
त्रस्यसपुत्रस्यसबांधवस्यसपरिजनस्यसपशोः श्रीभवानीशंकरभगवतःप्रसादात्स

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कलारिष्टनिवृत्तिपूर्वकं तथापूर्वजन्मन्युपार्जितेहजन्मन्युपार्जितकायिकवाचिकमा
नसिकसांसर्गिकज्ञाताज्ञातमहापातकोपपातकानांनानाव्याधिरूपेणपरिपच्यमाना
नांविनाशनार्थं पुत्रादिसंततिपरंपराप्राप्त्यर्थं तथाचजातकगोचरक्रमेणदशांतर्दशा
दिभेदेनादित्यादिनवग्रहाणामानुकूल्यार्थमनुकूलानामनुप्रीत्यर्थंतज्जनितनानोत्पातो
पशमनार्थं सर्वदाएकादशस्थानस्थितफलप्राप्त्यर्थं मनसेप्सितकामनाभिवृद्ध्यर्थं
श्रीभवानीशंकरभगवतः प्रीत्यर्थंशिवार्चनांगभूतभूतशुद्ध्यादिसर्वविधिकरणार्थं ना
नानामगोत्रान्भवतोऽनेनतांबूलादिदानेनवृणेइत्याचार्यादीनृत्विजोवृत्वासंपूज्यचत
तःब्राह्मणान्प्रार्थयेत् ॥ पावनाः सर्ववर्णानांब्राह्मणाब्रह्मरूपिणः ॥ अनुगृह्णंतुमांस
द्योमहारुद्रास्य्यकर्मणि ॥ १ ॥ सर्वकर्मरतानित्यंवेदशास्त्रार्थकोविदाः ॥ श्रोत्रि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याः सत्यवाचश्चदेवध्यानरतायतः ॥ २ ॥ यद्वागमृतसंसिक्तावृद्धिंयांतिनर
द्रुमाः ॥ अंगीकुर्वंतुकर्मैतत्कल्पद्रुमसमाशिषः ॥ ३ ॥ यथोक्तानियमैर्युक्तामंत्रार्थस्थिर
बुद्धयः ॥ यत्कृपालोकनात्सर्वांऋद्धयोवृद्धिमाप्नुयुः ॥४॥ महारुद्रजपेपूज्याः संतुमेनि
यमान्विताः॥ अक्रोधनाःशौचपराःसततंब्रह्मचारिणः॥ ५ ॥ रुद्रध्यानपरानित्यंप्रसन्न
मनसःसदा॥ अदुष्टभाषिणःसंतुनसंतुपरिवादकाः॥६॥ षट्कर्मनिरताःश्रेष्ठाःसाधवश्चब
हुश्रुताः॥जपनिष्ठास्तपोनिष्ठाधर्मिष्ठाधर्मवेदिनः ॥७॥ अनूचानाःकुलीनाश्चशैवशास्त्र
विशारदाः ॥ पुण्यपापविचारज्ञावेदवेदांगपारगाः ॥ ८ ॥ एवमेकादशाष्टौवाच
त्वारोद्वावथैककः ॥ ममापिनियमाह्येतेभवंतुसततंद्विजाः ॥ ९ ॥ इत्थंसंप्रार्थ्यंता
न्ब्रूयाद्यथावत्क्रियतांजपः ॥ इत्युच्चार्यंहस्तेकौसुंभसूत्रंबद्ध्वासपूगफलांदक्षिणांदद्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त् ॥ ततोब्राह्मणः ॥ ॐ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामा
प्नोतिश्रद्धयासत्यमाप्यते॥ॐयदाबध्नंदाक्षायणाहिरण्यꣳशतानि कायसुमनस्यमाना
॥ तन्मआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ २ ॥ इति मंत्रोच्चारणपूर्व
कमहंवृतोस्मीतिब्रूयात् ॥ ततोयजमानहस्तेकर्मदीक्षासूचकंकंकणंबंधयेत् ॥ ततः
शिवालयेपुण्यतीर्थेवायत्रमनोरमतितत्रवाएवमादिष्वेकंस्थानंगत्वातत्रशुद्धायां भू
मौदीपस्थानंविचिंत्यतत्रप्रागग्रान्कुशानास्तीर्य तदुपरिकृष्णाजिनंतदुपरिमृदुचैल
मास्तीर्यतेषामभावेयत्किंचिदनिषिद्धंतृणदारुपाषाणादिवर्जंशुभ्रासनंवा निदध्यात्
तत्रासनेसमुपविश्यस्वपुरतः पूर्वोक्तविधिनाकलशंस्थापयेत् गंधादिनापूजयित्वात
दुपरिपूर्णादर्विंपरापततेतिपूर्णपात्रंनिधायतदुपरिनारिकेलंतदुपरिवस्त्रेणाच्छाद्यपुष्प

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मालांकंठेकृत्वाकुंकुमचंदनाक्षतैश्चार्चयेत् ॥ तत्रकलशाधिष्ठितदेवताआवाहयेत् ॥
कलशंसंस्पृश्यतदभिमुखांजलिकरणं ॐनमः शिवायेतिपुष्पांजलिंदत्त्वाऽऽवाहयेद्दे
वदानवेति ॥ इत्यावाह्यततस्तस्मिन्कलशेसौवर्णींराजतींवाताम्रमयींवाकृतांमूर्तिंपु
रतः स्थापयित्वा ॥ समुद्रस्यत्वेत्यादिमंत्रैरग्न्युत्तारणंकुर्यात् ॥ यथा देशकालौसंकी
र्त्यअस्याःशिवमूर्तेर्घनादिदोषपरिहारार्थमग्न्युत्तारणंक० ॥ मूर्तिंघृतेनाभ्यज्योप
रिजलधारांकुर्यात् ॥ अग्न्युत्तारणमंत्राः ॥ ॐसमुद्रस्यत्वावकयाग्नेपरिव्ययामसि
॥ पावकोऽअस्मभ्य ठंशिवोभव ॥ ॥ १ ॥ हिमस्यत्वाजरायुणाग्नेपरिव्ययामसि
॥ पावकोऽस्मभ्य ठं शिवोभव ॥ २ ॥ उपज्मन्नुपवेतसेऽवतरनदीष्वा ॥ अग्नेपित्त
मपामसिमण्डूकिताभिरागहिसेमन्नोयज्ञम्पावकवर्णठंशिवंकृधि ॥ ३ ॥ अपामिदंन्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

 यनर्ठ॑ऽसमुद्रस्यानिवेशनं ॥ अन्याँस्तेअस्मत्तपन्तुहेतयःपावकोऽअस्मभ्य ठ॑ शिवोभव

 ॥ ४ ॥ अग्नेपावकरोचिषामन्द्रयादेवजिह्वया ॥ आदेवान्वक्षियक्षिच ॥ ५ ॥ सनः

पावकदीदिवोग्नेदेवाँ २ इहावह ॥ उपयज्ञठ॑हविश्चनः ॥ ६ ॥ पावकयय्याश्चितयन्त्या

कृपाक्षामन्नुरुचऽउषसोनभानुना ॥ तूर्व्वन्नयामन्नेतशस्यनूरणऽआयोघृणेनततृषा

णोअजरः ॥ ७ ॥ नमस्तेहरसेशोचिषे नमस्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेअस्मत्तपंतुहे

तयःपावको० ॥ ८ ॥ नृषदेव्वेडप्सुषदेव्वेड्बर्हिषदे व्वेड्वनसदेव्वेड्स्वर्व्विदेव्वेट् ॥

॥ ९ ॥ येदेवादेवानांयज्ञियायज्ञियानाःसंवत्सरीणमुपभागमासते ॥ अहुतादोहविषो

यज्ञेऽअस्मिन्त्स्वयंपिबन्तुमधुनोघृतस्य ॥ ११ ॥ येदेवादेवेष्वधिदेवत्वमायन्नेब्रह्म

णःपुरऽएतारोऽअस्य ॥ येभ्योनऽऋतेपवतेधामकिञ्चननतेदिवोनपृथिव्याऽअधि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्नुषु ॥ १२ ॥ प्राणदाऽअपानदाव्यानदाव्वर्च्चोदाव्वारिवोदाः ॥ अन्याँस्तेऽअ
स्मत्तपन्तुहेतयःपावकोऽअस्मभ्यर्ठशिवोभव ॥ १३ ॥ ॥ ततःप्राणप्रतिष्ठांकुर्यात्
॥ ॐ आँह्रींक्रोंयंरंलंवं शंषंसंहंक्षंहंसः सोहं ॥ अस्याःशिवमूर्तेःप्राणाइहप्राणाः ॥ पुनः
ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहंक्षंहंसः सोहं ॥ अस्याः शिवमूर्तेःजीवाइहस्थिताः ॥ पुनः
ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहं क्षंहंसःसोहं ॥ अस्याःशिवमूर्तेःसर्वेंद्रियाणि वाङ्मनस्त्व
क्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थानिइहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा
ॐ मनोजूतिज्जुषंता० ॥ एषवैप्रति० ॥ २ ॥ इतिप्रतिष्ठाप्य ॥ ॥ घृतेनवृत्रस्यासी
तिनेत्रोन्मीलनं ॥ ॐ वृत्रस्यासिकनीनकश्चक्षुर्द्दाऽअसिचक्षुर्म्मेदेहि ॥ गंधादिपंचो
पचारान्दत्त्वाआहारंभक्ष्यभोज्यंचनैवेद्यंप्रतिगृह्यताम्प्राणायस्वा० ॥ संस्कारासिद्ध

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येषोडशप्रणवावृत्तिंकुर्यात् ॥ ॥ अनेनअस्याःशिवमूर्तेःगर्भाधानादिषोडशसंस्कारा न्संपादयामीतिवदेत् ॥ ॥ इतिप्राणप्रतिष्ठा ॥ ॥ ततःतामुमामहेश्वरमूर्तिंप्रत्यङ्मुखां स्थापयेत् ॥ इति प्राणप्रतिष्ठांकृत्वाध्यायेत् ॥ पंचास्यंचत्रिनेत्रंदशभिरभिलसत्कां चनैर्बाहुदंडैर्नीलग्रीवंविशुद्धं स्फटिकनिभतनुंनागहारोपशोभं ॥ बिभ्राणंचंद्रलेखां स्फुरदमलमहाभालदेशेविशुद्धंव्याघ्रस्याथद्विपस्योभयमजिनवरं चांबरंचोत्तरीयम् ॥ १ ॥ पाथःपात्राक्षसूत्राभयडमरुफणींद्रान्विताः पंचहस्ताःशूलंखड्वांगबाणौधनुर थमुकुरोदक्षिणेवामभागे ॥ यानेपुष्टंविशुद्धंवृषभमनुगतंचंदनैश्चर्चितांगंदिव्यैःसौ रभ्यभोगैस्तमचलमनसाचिंतयित्वानमामि ॥ एवंध्यात्वा ॥ नमोभगवतेरुद्रायेति मंत्रेणसर्वोपचारैः पूजनंकृत्वा ॥ न्यूनातिरिक्तंप्रार्थयेत् ॥ रुद्रपूजासुयन्न्यूनमतिरि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्तंतुयद्भवेत् ॥ रुद्रविप्रप्रसादेनपरिपूर्णंतदस्तुमे ॥ महारुद्रादिरुद्रादावेतावत्कर्मनि
श्चितं ॥ लघुरुद्रादिकेजाप्येतत्कर्त्तव्यंनिजेच्छया ॥ हरिःॐतत्सत् ॥ इतिकर्त्तव्यता
समाप्ता ॥ ॥ छ ॥ ॥ श्रीः ॥ ॥ अथातःषडंगरुद्राणांन्यासपूर्वकंजपहोमार्चनविधि
र्व्याख्यायते ॥ पूर्वंगणपतिंनमस्कृत्यआचार्यः ॐनमोभगवतेरुद्रायेतित्रिराचमनं
प्राणायामंचकृत्वा ॥ ॐ हृदयायनमः ॥ नंमों शिरसेस्वाहा ॥ भंगंशिखायैवषट् ॥
वंतेंकवचायहुं ॥ रुंद्रांनेत्रत्रयायवौषट् ॥ यंअस्त्रायफट् ॥ रुद्रं मनसाध्यात्वादेशकालौ
स्मृत्वातत्पूजांगभूतमधुनास्नानमहंकरिष्ये ॥ इतिसंकल्पंकृत्वातीर्थान्यावाह्य ॥ गं
गेच० ॥ ॐब्रह्मांडोदर० ॥ क्रोंइतिबीजंस्मरन् अंकुशमुद्रयार्कमंडलात्तीर्थान्यावाह्य॥
वंइत्याप्लाव्य ॥कवचेनावगुंठ्य॥ ॐनमोभ०॥ १ १॥ जलमभिमंत्र्य ॥ नमःशंभवायेति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निमज्ज्यतमेवध्यायन्जपित्वोन्मज्य ॥ असंख्यातेतिमंत्रैःकलशमुद्रयाआत्मानमभि
षिंचेत् ॥ इतिस्नानंकृत्वा ॥ ततआचम्यत्रिपुंड्रंकुर्याद्भस्मना ॥ ततोरुद्राक्षान्धृत्वा ॥
यथोक्तसंध्यावंदनं कृत्वातदनंतरंअसौयस्ताम्रइतिरुद्ररूपायार्घंदद्यात् ॥ ततोयथा
शक्तिरुद्रगायत्रींजप्त्वाश्रीरुद्रायसमर्प्यनमस्कुर्यात् ॥ एवंस्नानादिनमस्कारांतंकर्म
कृत्वासमाचम्यप्राणायामंकृत्वार्घपात्रंजलपूर्णमादायमुनिद्वारमस्त्रांबुनाप्रोक्ष्य द्वार
पालान्प्रपूजयेत् ॥ तद्यथा ॥ ॐ निवृत्तिकीलायद्वारायनमः ॥ ॐ विमलाय० ॥
ॐसुबाहवे० ॥ इतिकपाटयोः ॥ अथद्वारोर्ध्वस्थितंलंबोदरंसंपूज्यानेनमंत्रेण ॥
श्यामंलंबोदरंस्थूलंगजवक्त्रंचतुर्भुजम् ॥ दंताक्षसूत्रेदक्षेतुवामेपरशुलड्डुकौ ॥ बिभ्रा
णंवामनंत्र्यक्षंद्वारोर्ध्वेदक्षिणेयजेत् ॥ ॐगंगणपतयेनमः ॥ श्वेतांसरस्वतींबालां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वशोभाविभूषितां ॥ वामदक्षकराभ्यांतुवीणावादनतत्परां ॥ पुस्तकाक्षधरांद्वा
भ्यांद्वारोर्ध्वेचोत्तरेयजेत् ॥ ॐसंसरस्वत्यैनमः ॥ मध्येतयोर्महालक्ष्मींस्वर्णवर्णां
स्मिताननाम् ॥ श्रीफलाब्जधरांदक्षेवामेपद्माभयान्विताम् ॥ सिच्यमानांमहाह
स्तिहस्तैःकुंभामृतोदकैः॥ ॐह्राःश्रियैनमः॥श्रीनंदिकेश्वरंरक्तंजटायज्ञोपवीतिनम्
॥ त्रिशूलाक्षधरं सौम्यंवरदाभयपाणिनम् ॥ यजेद्दक्षिणशाखायां त्रिनेत्रंचंद्रभूषण
म् ॥ ॐ नंनंदिकेश्वरायनमः ॥ जह्नुकन्यांसितांसौम्यांमकरोपरिसंस्थिताम् ॥
श्वेतचामरपीयूषकलशासक्तबाहुकाम् ॥ यजेदुत्तरतस्तस्यनंदिनःसर्वभूषणां ॥
ॐगंगंगायै० ॥ कृष्णपिंगजटाभीमंदंष्ट्राविकटवक्त्रकम् ॥ भ्रूकुटीभीषणंपीनंनागय
ज्ञोपवीतिनम् ॥ कपालखट्वांगधरंसर्वदुंदुभिमंडितं ॥ यजेदुत्तरशाखायांयाम्यंय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्यामतोविशेत् ॥ अर्घ्योदकंन्यसेद्वामेगंधपुष्पादिदक्षिणे ॥ अग्रेघंं पार्श्वतोदीपंफ लाद्यन्यद्यथारुचि ॥ इत्येवंपूजोपकरणसर्वसंभारान्सम्यक्संपाद्यआसनेउपविश्यए काग्रचित्तोभूत्वा ॥ पृथ्वीतिमंत्रस्य मे० ॥ आसनेवि० ॥ ॐपृथ्वित्व० ॥ ॐह्रींआधा रशक्तिकमलासनायनमः ॥ सिंहासनाय० ॥ अनंतासना० ॥ ॐभूर्भुवःस्वः कूर्मास० ॥ इत्यासननतिं विधायासनेउपविश्य ॥ वज्रशिलायांजलंप्रक्षिप्यवाम पादेनभूमिमाताड्यवारत्रयंनाराचमुद्रांप्रदर्शयेत्॥ ततःॐनमोगुरुभ्योगुरुपादुकाभ्यो नमःपरेभ्यःपरपादुकाभ्यः ॥ आचार्यसिद्धेश्वरपादुकाभ्योनमोस्तुदेवीपदपंकजे भ्यः ॥ इतिगुर्वादिनतिंविधाय ॥ प्रथमंभूमिशुद्धिंचभूतशुद्धिंतथैवच ॥ जपेच होमकालेचआत्मशुद्धिंचकारयेत् ॥ तत्रादौभूमिशुद्धिः ॥ तद्यथा ॥ ॐभूरसीत्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्यप्रजापतिर्ऋषिःप्रस्तारपंक्तिच्छंदःस्वयमातृणादेवता ॥ योभूतानामित्यस्यकौंडिन्यऋषिःत्रिष्टुप्छंदः श्रीनारायणोदेवता ॥ भंबीजं द्वयोर्मंत्रयोःक्षेत्रशुद्धौभूताधिपतिप्रार्थनेविनियोगः ॥ ॐभूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्रीं पृथिवीयच्छ पृथिवींदृꣳह पृथिवींमाहिꣳसीः ॥ ॥ १ ॥ योभूतानामधिपतिर्यस्मिँल्लोकाव्यधिश्रिताः ॥ यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवाय हविषाविधेम ॥ इति प्रार्थ्य ॥ ॐ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम ॥ भैरवायनमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ ततोदशाक्षरेणप्राणायामंकुर्यात् ॥ ततः सामान्यभूतशुद्धिः ॥ ॐ अस्यशरीरस्यात्माऋषिः जगतीछंदः परंज्योतिर्देवताहूंइतिमंत्रेणद्वादशांतेआत्मविनियोजनेविनियोगः ॥ आधारस्थानेध्यायन्सुषुम्नयाद्वादशांतंनीत्वादक्षिण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुक्षौपूर्वंजन्माघमयंपुरुषंकृष्णरूपंध्यात्वा पूरकेणयंयमित्येकादशवारंजपित्वा शो
षयेत् ॥ कुंभकेनरंरमित्येकादशवारं जपित्वादाहयेत् ॥ रेचकेनवंवमित्येकादश
वारंजपित्वाआप्लावयेत् ॥ पूरककुंभकरेचकैःलंएकादशवारंजपित्वाशुद्धमात्मानं
ध्यायेत् ॥ एवंशिवरूपिणंपुरुषंध्यायेत् ॥ तद्यथा ॥ शिरस्यष्टदलं पद्मंकार्णिका
केसरान्वितम् ॥ सितंविकसितंभद्रंकल्पयित्वातुनिर्मलम् ॥ स्मरेत्तत्रशिवंदीपसन्निभं
चित्प्रकाशकं ॥ तस्मादीश्वराद्दिव्यदेहमुत्पन्नमितिध्यात्वा ॥ आनयेदीश्वराज्जीवंब्र
ह्मरंध्रादिमार्गतः ॥ संस्थाप्यहृदयांभोजेमनःप्राणादिसंयुतं ॥ संजीविनींस्मरेद्विद्यांय
थाशास्त्रप्रणोदितां ॥ यद्यदारभ्यतेकर्मतत्तदेवविशुध्यति ॥ इतिभूतशुद्धिंकृत्वाप्राण
स्थापनंकुर्यात् ॥ ॐअस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहेश्वराऋषयः शिरसि ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋग्यजुःसामानिच्छंदांसिमुखे ॥ क्रियामयवपुः प्राणशक्तिर्देवताहृदि ॥ आंबीजंलिंगे॥
ह्रींशक्तिःगुह्ये ॥ क्रोंकीलकंनाभौ ॥ ममश्रीभवानीशंकरभगवतःप्रसादसिद्ध्यर्थं
प्राणप्रतिष्ठान्यासेविनियोगः ॥ ॐआंह्रींक्रोंअंकं० ४ आंपृथिव्यप्तेजोवाय्वाकाशा
त्मनेहृदयायनमः ॥ अंगुष्ठयोः ॥ १ ॥ ॐ आं० इंचं० ४ ईंशब्दस्पर्शरूपरसगंधात्मने
शिरसेस्वाहा ॥ तर्जन्योः ॥ २ ॥ ॐआं० उंटं० ४ ऊंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनोशि
खा० ॥ मध्य० ॥ ३ ॥ ॐ आं० एंतं० ४ ऐंवाक्पाणिपादपायूपस्थात्मनेकव० ॥
अना० ॥ ४ ॥ ॐ आं औंपं० ४ औंवचनादानविहरणोत्सर्गानंदात्मनेनेत्र० ॥ क
नि० ॥ ५ ॥ ॐ आंह्रींक्रों अंयं० ४ अःमनोबुद्ध्यहंकारप्रकृतिपुरुषात्मनेअस्त्रा० ॥
करत० ॥ ध्यानं ॥ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैःपाशंकोदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

डामिक्षूद्भवमथगुणमप्यंकुशंपंचबाणान्॥ बिभ्राणासृक्कपालंत्रिनयनविलसत्पीनवक्षो
रुहाढ्यादेवीबालार्कवर्णाभवतुसुखकरीप्राणशक्तिःपरानः ॥इति ध्यानं ॥ हृदिहस्तं
दत्त्वामंत्रंजपेत् ॥ ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहंळंक्षंसोहंहंसःममप्राणेनसहश्रीशिवस्य
प्राणाइहप्राणाः ॥ ॐ आंह्रीं० ॥ ममजीवेनसहश्रीशिवस्यसर्वेंद्रियाणिवाङ्मनश्च
क्षुःश्रोत्रजिह्वाघ्राणप्राणाइहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा ॥ ततःॐकारावृत्त्यासं
स्कारान्शिरसिबाह्वोश्चस्पर्शं कृत्वानिजवपुर्ज्योतिर्मयंध्यायेत् ॥ ॥ इतिप्राणप्रति
ष्ठा ॥ ॥ अथमातृकान्यासक्रमः ॥ ॥ गुदात्द्व्यंगुलादूर्ध्वंसुषुम्णामूलरंध्रगं ॥ वादि
वेदार्णलसितंपंकजंकनकप्रभं ॥ तत्स्थांविद्युल्लताकारांतेजोरेखामणीयसीं ॥ कुल
कुंडलिनीमूर्ध्वंषट्चक्रक्रमभेदिनीं ॥ द्वादशांतेंदुमध्यस्थंपूर्वोक्तं मातृकांबुजं ॥ नव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नीतानिभंध्यात्वावृत्तांकुंडलिनींतथा ॥ तेजोंजलौविनिःसार्थमातृकान्यासमाचरेत्
॥ अंआंइंईंउंऊंइतिषट्चक्रान्दक्षिणवामकरतलतत्पृष्ठतद्व्यातिक्रमेणन्यसेत् ॥ शि
ष्टान्दशस्वरान्अंगुष्ठादिकनिष्ठांतदशांगुलीषुन्यसेत् ॥ दक्षिणप्रदेशिनीमारभ्यवाम
कानिष्ठिकापर्यंतपर्वत्रयाग्रेषुचतुरश्चतुरःकादिसांतान्वर्णान्हळावंगुष्ठयोः ॥ क्षमंगु
ल्यग्रेन्यसेत् ॥ इतिकरशुद्धिः ॥ अस्यश्रीअंतर्मातृकान्यासस्यब्रह्माऋ०गा०अंतर्मा
तृकादेवताहलोबीजानिस्वराःशक्तयःक्षःकीलकंअंतर्मातृकान्यासेवि० ॥ ॐ अंकं०
४ आंह ०॥ इंचं० ४ ईंशिर० ॥ उंटं० ४ ऊंशि० ॥ ॐ एंतं० ४ ऐंकव० ॥ ॐ
ओं पं० ४ औंने० ॥ ॐअंयं० ४ अःअस्त्राय० ॥ बंधूकाभांत्रिनेत्रांपृथुजघनलस
च्छुक्तिमद्रक्तवस्त्रांपीनोत्तुंगप्रवृद्धस्तनजघनभरांयौवनाभाररूढां ॥ दिव्यालंकारयु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्तांसरसिजनयनामिंदुसंक्रांतमंबांमूर्ध्नापाशांकुशाढ्यामभयवरकरांमातृकांतां नमा
मि ॥ १ ॥ आधारे लिंगनाभौहृदयसरसिजेतालुमूलेललाटेद्वेपत्रेषोडशारेद्विदशद
शदलेद्वादशार्द्धेचतुष्के ॥ वासांतेवालमध्येडफकठसहितेकंठदेशेस्वराढ्ये हंक्षंत
त्वार्थयुक्तंसकलदलगतंवर्णरूपंनमामि ॥ वंशंषंसंचतुष्के ॥ बंभंमंयंरंलंषड्दले॥
डंढंणंतंथंदंधंनंपंफंदशदले ॥ कादिठांतंद्वादशदले ॥ स्वराःषोडशदले ॥ हंक्षंद्वि
पत्रे ॥ पूर्ववत्षडंगः ॥ पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशांभास्वत्क
पर्दांकलितशशिकलामिंदुकुंदावदाताम् ॥ अक्षस्रक्कुंभचिंतालिखितवरकरांत्रीक्षणां
पद्मसंस्थामच्छाकल्पामपूर्वस्तनभरजघनांभारतींतांनमामि ॥ १ ॥ ॐ अंनमः
शिरसि ॥ आं० मुखे ॥ इंईंनेत्रयोः ॥ उंऊंकर्णयोः ॥ ऋंॠंनासापुटयोः ॥ ऌंॡंक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पोलयोः ॥ एंऐंदंतयोः ॥ ओं औंओष्ठयोः ॥ अंजिह्वामूले ॥ अःग्रीवायाम् ॥ कादिपंचदक्षिणभुजे ॥ चादिपंचवामभुजे ॥ टादिपंचदक्षिणपादे ॥ तादिपंचवामपादे ॥ पंफंपार्श्वयोः ॥ बंपृष्ठे ॥ भंनाभौ ॥ मंउदरे ॥ यंत्वगात्मनेनमः ॥ रंअसृगा० ॥ लंमांसात्म० ॥ वंमेद० ॥ शंअस्थ्या० ॥ षंमज्जात्म० ॥ संशुक्रात्मने० ॥ हंआत्मशक्तयेनमः ॥ क्षंपरमात्मशक्तयेनमः ॥ ततोन्यासंप्रकुर्वीतसचैकादशधा मुने ॥ ततःशरीरस्थनेत्रादिबिलबिलविन्यस्तं सप्तर्षिशिरोलक्षणंछंदः पुरुषमेवं वक्ष्यमाणोक्तप्रकारेणस्वशरीरेन्यसेत् ॥ ॐ वासिष्ठकश्यपाभ्यां नमः ॥ नासिकाभ्यांनमः ॥ नासापुटद्वये० ॥ ॐ अत्रयेनमः ॥ वाचेनमः ॥ मुखे ॥ ४ ॥ ॥ इति सप्तर्षिन्यासः ॥ १ ॥ ॐ गायत्र्यैअग्नयेनमः ॥ शिरसेनमः ॥ शिरसि ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उष्णिहेसवित्रेनमः ॥ ग्रीवायैनमः ॥ ग्रीवायां ॥ २ ॥ बृहत्यैबृहस्पतयेनमः ॥ अनू
कायनमः॥अनूके ॥३॥बृहद्रथंतराभ्यांद्यावापृथिवीभ्यांनमः॥बाहुभ्यांनमः ॥बाह्वोः॥
॥ ४ ॥ त्रिष्टुभेइंद्रायनमः ॥ मध्यायनमः ॥ नाभिदेशे ॥ ५ ॥ जगत्यैआदित्यायन
मः ॥ श्रोणिभ्यांनमः ॥ श्रोण्योः ॥ ६ ॥ अतिच्छंदसेप्रजापतयेनमः ॥ गुह्याय०
॥ लिंगे ॥ ७ ॥ यज्ञाययज्ञियायवैश्वानराय० ॥ पायवे० ॥ गुदे ॥ ८ ॥ अनुष्टु
भेविश्वेभ्योदेवेभ्यो०॥ ऊरुभ्यां०॥ ऊर्वोः॥९॥ पंक्त्यैमरुद्भयो०॥जानुभ्यां०॥ जान्वोः
॥१०॥ द्विपदायैविष्णवे०पादाभ्यां०॥ पादयोः ॥११॥ विच्छंदसेवायवेनमः॥ प्राणे
भ्यो० ॥ प्राणेषु ॥ १२ ॥ न्यूनाक्षरायैअद्भयो० ॥ सर्वशरीरावयवेभ्यो० ॥ न्यू
नातिरिक्तयोः ॥ ॥ इतिछंदोदेवतापुरुषलक्षणेन्यासः ॥ २ ॥ ॐ जातवेदसेसुन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्य
ग्निः ॥ अक्षरंब्रह्मसदनंवेदानांशिरउत्तमं ॥ गायत्रीच्छंदसांमातर्ब्रह्मभूर्भुवः स्वरोम्
॥ १ ॥ यथाशक्तिजपेत्॥ ॥ ॐ भूर्भुवःस्वः चतुःस्त्राक्तिर्नाभितस्यसप्रथाः सनोविश्वायुः
सप्रथाःसनःसर्वायुःसप्रथाः॥ अपद्वेषोअपह्वरोन्यव्रतस्यसाश्चिम ॥२॥अनेनासनंस्पृशे
त् ॥ ॐ मनो जूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञठंसमिमंदधातु ॥
विश्वेदेवासइहमादयंतामों३प्रतिष्ठ ॥१॥ हृदयायनमः ॥ ॐ अबोध्यग्निःसमिधाजना
नांप्रतिधेनुमिवायतीमुषासं ॥ यह्वाइवप्रवयामुज्जिहानाः प्रभानवः सिस्रतेनाकमच्छ
॥२॥शिर०॥ ॐ मूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं॥ कविठंसम्राज
मतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥३॥ शिखा० ॥ ॐ मर्माणितेवर्मणाछादया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्वरीयोवरुणस्तेकृगोतुजयंतंत्वानुदेवामदं
तु ॥ ४ ॥ कव० ॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥
संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ॥ ५ ॥ नेत्र० ॥ ॐमानस्तोकेत
नयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मं
तःसदमित्वाहवामहे ॥ ६ ॥ अस्त्रायफट् ॥ हस्ताभ्यांपरस्परतालत्रयंकृत्वाइत्या
त्मानमभितः तर्जन्यंगुष्ठाभ्यांपुनःपुनः संयुक्तविमुक्ताभ्यांमिथ्यामुद्रयासर्वतोदिक्षु
अस्त्रंविन्यसेत् ॥ ॐ भूर्भुवःस्वःइतिदिग्बंधम् ॥ ॥ इतिलघुषडंगन्यासः ॥ ३ ॥
ततोजातवेदसइतिमंत्रंजप्त्वाप्राकारंकल्पयेत् ॥ शिवंध्यात्वाबृहत्षडंगंन्यासमार
भेत् ॥ सचैवम् ॥ यज्जाग्रतइतिषट्कस्याशिवसंकल्पऋषिःत्रिष्टु० मनोदे० यथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लिंगोक्तकर्मणिवि० ॥ यज्जाग्रतइत्यादिषट्कंडिकाउक्त्वाहृदयायनमः ॥ १ ॥
सहस्रशीर्षेत्यादिषोडशर्चस्यचनारा० आद्यानांपंचदशानामनुष्टुप्छंदः अंत्या
त्रिष्टु० सर्वासांपुरुषोदे० शिरोन्यासेवि० सहस्रशीर्षेत्यादिषोडशर्चंउक्त्वाशि
रसेस्वाहा ॥ २ ॥ अद्भ्यःसंभृतइतिषट्कस्योत्तरनारा० आद्यानांतिसृणांत्रि० द्वयो
रनु० अंत्यात्रि०षण्णांपुरुषोदे०शिखान्या० ॥ अद्भ्यःसंभृतइत्यादिषडृचमुक्त्वाशि
खायैवषट् ॥ ३ ॥ आशुःशिशानइतिसप्तदशानामप्रतिरथऋ० आद्यानांद्वादशा
नांत्रि०इंद्रोदे० ॥ अवसृष्टेत्यनुवाकस्यइषुर्दे० ॥ प्रेतेत्यनु०इंद्रोदे० ॥ असौयेति
त्रि० मरुतोदे० ॥यत्रेतिपंक्तिच्छं० वाणोदे० ॥ मर्माणिकवचन्या० ॥ आशुःशि
शानइत्यादिसप्तदशानुवाकंमदंतु इत्यंतमुक्त्वाकवचायहुं ॥ ४ ॥ विभ्राडृत्यस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विभ्राड्० ॥ जग० उदुत्यमितित्रयाणांप्रस्कण्वऋ०गा०चतुर्णांसूर्योदे० ॥ तंप्रत्नथे
त्यस्यवत्सारकश्यपावृ० विश्वेदे० ॥ अयंवेनइत्यस्यवेनऋ० त्रि० सोमोदे० ॥ चि
त्रमित्यस्यकुत्सऋ० त्रि० आनइत्यस्यअगस्त्यऋ० त्रि० ॥ यदद्येत्यस्यतकक्षसुक
क्षा० गा० तरणिरित्यस्यप्रस्कण्वऋ० गा० तत्सूर्यस्येतिद्वयोः कुत्सऋ० त्रि० ब
डितिद्वयोर्जमदग्निर्ऋ० बृहती० आद्यादे० आकृष्णेनइत्यस्याहिरण्यस्तूप० त्रि० स
विता० सर्वेषांनेत्रन्यासे० विभ्राडित्यादिभुवनानिपश्यन्नित्यंतमुक्त्वानेत्रत्रयायवौष
ट् (अयंनेत्रन्यासोनित्यजपेभवेत् ॥ नतुकाम्यादौ०) ॥ ४ ॥ कनिष्ठांगुष्ठवर्जिते
नांगुलित्रयेणन्यसेत् ॥ ५ ॥ नमस्तइत्यादिषोडशानांपरमेष्ठीप्रजापतिर्ऋ० मानोद्व
यस्यकुत्सोवाऋ० नमस्तइत्यस्यगा० यातइत्यादितिसृणामनु० अध्यवोचदित्यादि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिसृणांपं० ॥ नमोस्त्वित्यादिसप्तानामनु०मानइतिद्वयोर्जमद० ॥ नमस्तइत्यादिषोडशानां सर्वासामेकरुद्रोदे० सर्वदिक्षुअस्त्रन्या० ॥ अन्यत्रशतशीर्षरुद्रशांतिहोमादौ ॥ नमस्तइत्यादिहवामहइत्यंतंषोडशर्चमुक्त्वाअस्त्रायफट् ॥ ॥ इतिषडंगन्यासः ॥ ४ ॥ व्याहृतिन्यासः ॥ ॐ हृदयायनमः ॥ भूःशिर० ॥ भुवःशिखा० ॥ स्वःकव० ॥ ॐभूर्भुवःस्वःअस्त्राय० ॥ इतिनेत्रवर्जितव्याहृतिन्यासः ॥ ५ ॥ ॐक्रिरिकेभ्योनमः मुखे ॥ १ ॥ देवानांहृदयेभ्योनमः वक्षस्थले ॥ २ ॥ विचिन्वत्केभ्योनमः शिरसि ॥ ३ ॥ विक्षिणत्केभ्योनमः नाभौ ॥ ४ ॥ आनिर्हतेभ्योनमोलिंगे ॥ ५ ॥ इतिरुद्रव्याहृतिन्यासः ॥ ६ ॥ ॐयातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशंतमयागिरिशंताभिचाकशीहि ॥ १ ॥ शिखायैनमः ॥ अस्मिन्महत्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्णवेंतरिक्षेभवाअधि ॥ तेषाꣳसहस्त्रयोजनेवधन्वानितन्मसि ॥ १ ॥ शिरसे० ॥ सह
स्त्राणिसहस्त्रशो येरुद्राअधिभूम्याम् ॥ तेषाꣳ० ॥ १ ॥ ललाटाय० ॥ हꣳसःशुचिषद्व
सुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजा
अद्रिजाऋतंबृहत् ॥ १ ॥ भ्रुवोर्मध्याय० ॥ त्र्यंबकंयजामहेसुगंधिंपु० ॥ १ ॥ नेत्रा
भ्यां० ॥ तर्जन्यनामिकाभ्यां युगपन्नेत्रद्वयेविन्यसेत् ॥ नमःस्त्रुत्यायचपथ्यायच नमः
काट्यायचनीप्यायच ॥ नमःकुल्यायचसरस्यायचनमोनादेयायचवैशंतायच ॥ १ ॥
कर्णाभ्यां०॥मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥मानोवीरान्
रुद्रभामितोऽवधीर्हविष्मंतःसदमित्वाहवामहे ॥ १ ॥ नासिकायै० ॥ अवतत्यधनुष्ट्व
ꣳ सहस्त्राक्षशतेषुधे ॥ निशीर्यशल्यानांमुखाशिवोनःसुमनाभव ॥ १ ॥ मुखाय ० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ नीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः ॥ तेषाꣳस० ॥ १ ॥ कंठाय० ॥ नी
लग्रीवाःशितिकंठादिवꣳ रुद्राउपश्रिताः ॥ तेषाꣳ स० ॥ १ ॥ उपकंठाय० ॥
नमोगणेभ्योगणपतिभ्यश्चवोनमः ॥ १ ॥ पृष्ठे ॥ नमस्तआयुधायानाततायधृ
ष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यांतवधन्वने ॥ १ ॥ बाह्वोः ॥ यातेहेतिर्मी
ढुष्टमहस्तेबभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ १ ॥ उपबाह्वोः॥
येतीर्थानिप्रचरंतिसृकाहस्तानिषंगिणः ॥ तेषाꣳस० ॥ १ ॥ हस्तयोः ॥ नमोवः
किरिकेभ्योदेवानाꣳहृदयेभ्योनमोविचिन्वत्केभ्योदेवानाꣳहृदयेभ्योनमो विक्षिण
त्केभ्योदेवानाꣳहृदयेभ्योनमआनिर्हतेभ्योदेवानाꣳहृदयेभ्यः ॥ १ ॥ हृदये ॥ इंद्र
स्यक्रोडोदित्यैपाजस्यंदिशां जत्रवोदित्यैभसज्जीमूताहृदयौपशेनांतरिक्षं पुरीततान

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भऽउदर्य्येणचक्रवाकौमतस्नाभ्यांदिवं वृक्काभ्यांगिरीन्प्लाशिभिरुपलात्प्लीह्नावल्मी
 कान्क्रोमभिग्लौभिर्गुल्मान्हिराभिः स्रवंतीर्ह्रदान्कुक्षिभ्यार्ठ समुद्रमुदरेणवैश्वानरं
भस्मना ॥ १ ॥ उदरे ॥ नमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमः॥ १॥ पार्श्वयोः ॥
हिरण्यगर्भःसमवर्त्ततागेभूतस्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवींद्यामुतेमांक
स्मैदेवायहविषाविधेम ॥ १॥ नाभौ ॥ नमस्तक्षभ्योरथकारेभ्यश्ववोनमः ॥ १ ॥ कु
क्षौ ॥ मीढुष्टमशिवतमःशिवोनः सुमनाभव ॥ परमेवृक्षआयुधंनिधायकृत्तिंवसा
नआचरपिनाकंबिभ्रदागहि ॥ १ ॥ कट्यां ॥ जातवेदसेसुनवामसोममरातीयतो
निदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ १ ॥ पायौ
॥ इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वम्पुष्टंग्रामेऽअस्मिन्ननातुरम् ॥ १ ॥ गुह्ये ॥ मानोमहांतमुतमानोअर्भकंमानउक्षं
तमुतमानउक्षितं ॥ मानोऽवधीःपितरंमोतमातरंमानःप्रियास्तन्न्वोरुद्ररीरिषः ॥ १ ॥
ऊर्वोः ॥ एषतेरुद्रभागस्तंजुषस्वतेनावसेनपरोमूजवतोतीह्यवततधन्वापिनाकहस्तः
कृत्तिवासाः ॥ १ ॥ जान्वोः ॥ येवृक्षेषुशष्पिंजरानीलग्रीवाविलोहिताः ॥ तेषाᳬंस०
॥ १ ॥ जंघयोः ॥ भेषजमसिभेषजंगवेश्वायपुरुषायभेषजं ॥ सुखंमेषायमेष्यै ॥ १ ॥
गुल्फयोः ॥ येपथांपथिरक्षयऐलबृदाआयुर्युधः ॥ तेषाᳬंस० ॥ १ ॥ पादयोः ॥ अध्य
वोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहींश्चसर्वाञ्जंभयन्सर्वांश्चयातुधान्योधराचीः
परासुव ॥ १ ॥ कवचं ॥ नमोबिल्मिनेचकवचिनेच ॥ १ ॥ उपकवचं ॥ (कवचाद्वि
परीतक्रममुपकवचं ॥) नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेअस्यसत्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नोहंतेभ्योकरंनमः ॥१॥ तृतीयनेत्रे ॥ विज्यंधनुःकपर्दिनोविशल्योबाणवाँ २ उत ॥ अनेशन्नस्ययाइषवआभुरस्यनिषंगधिः ॥ १ ॥ यत्रबाणाःसंपतंतिकुमाराविशिखा इव ॥ तन्नइंद्रोबृहस्पतिरदितिः शर्मयच्छतुविश्वाहाशर्मयच्छतु ॥२॥ बाणाकारमंगुष्ठकनिष्ठिकावर्जमंगुलित्रयमूर्ध्वमृजुंदर्शयेत् ॥ प्रमुंचधन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्चतेहस्तइषवःपराताभगवोवप ॥ १ ॥ हस्तद्वयेनतालत्रयंकृत्वाऽस्त्रंन्यसेत् ॥ यए तावंतश्चभूयांसश्चदिशोरुद्रावितस्थिरे ॥ तेषांसः ॥ १ ॥ विश्वतश्चक्षु० ॥ २ ॥पूर्ववद्दिग्बंधंकुर्यात् ॥ इत्यंगन्यासः ॥७॥ ॐनमोभगवतेरुद्रायेति मंत्रस्यप्रजापतिर्ऋ० विराट्छंदःरुद्रोदे०॥दशांगन्यासे०॥ ॐनमः मूर्ध्नि॥ नं० नासिकायां॥ मों० ललाटे ॥ भं० मुखे ॥ गं० कंठे ॥ वं० हृदये ॥ तें० दक्षिणहस्ते ॥ रुं० वामहस्ते ॥ द्रां० नाभौ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यं० पादयोः ॥इतिदशाक्षरमंत्रवर्णन्यासः ॥८॥ ॐकालाग्निरुद्रायनमः पादयोः॥कूर्मा
य० जान्वोः ॥ भीमाय० उदरे ॥ वामदेवाय० शिरसे ॥ सदाशिवाय० शिखायां ॥ श्री
रुद्राय० शीर्षे ॥ इंदुशेखराय० शिखायां ॥ त्रिनेत्राय० नेत्रयोः॥ भैरवाय० श्रोत्रयोः॥
शंकराय० नासि० ॥ पशुपतये० मुखे ॥ नीलकंठाय० कंठे ॥ व्यापकाय० हृदि ॥
गंगाधराय० हस्तयोः॥ शिवाय० नाभौ ॥ कामदेवाय० गुह्ये॥ त्र्यंबकाय० जंघयोः॥
सर्वज्ञाय० पादयोः॥ शिवायनमः सर्वतः॥ कालाग्निरुद्राय० पादयोः॥ भवोद्भवाय०
जंघयोः ॥ वृषारूढाय० जान्वोः ॥ त्रिमूर्त्तये० कट्योः ॥ समस्तश्रीप्रदाय० नाभौ ॥
महादेवाय० हृदि ॥ नीलकंठाय० कंठे ॥ श्रीमुखाय० मुखे ॥ ॥ प्राणेशप्राणरक्षि
तृभ्यां० नासिकायां ॥ भैरवाय० श्रोत्रयोः ॥ त्रिनेत्राय० नेत्र० ॥ श्रीरुद्रशेखरा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

य० भाले ॥ शिवाय० मस्तके ॥ पंचाशिखाय० शिखा० ॥ ॐशिवायनमः इति
मस्तकादिपादांतंव्यापकमुद्रयासर्वशरीरेन्यसेत् ॥ इतिरुद्रनामन्यासः ॥ १ ॥ ॐ
सद्योजातमित्यस्यसद्योजातऋषिः गा० ब्रह्मादे० हंसवाहनंपश्चिमवक्त्रंकपिलवर्णं
पृथ्वीतत्वंइषुमुद्राब्रह्मरूपायनमः हांबीजंपादन्यासे०॥ ॐहांसद्योजातंप्रपद्यामिसद्यो
जातायवै नमः॥भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ १॥ कनिष्ठांगुष्ठयोगेनपा
दयोर्न्यसेत् ॥ १ ॥ वामदेवस्येतिवाम० ब्राह्मी॥विराट्० नारायण० गरुडवा० उत्तरव
क्त्रंसिंदूरवर्णमापस्तत्त्वं पद्ममुद्राविष्णुरूपायनमः हींबीजंऊरुन्यासे० ॐहींवामदेवा
यनमोज्येष्ठायनम ः श्रेष्ठायनमो रुद्रायनमः कालायनमःकलविकरणायनमोबलविक
रणायनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अंगुष्ठानामिकायोगेनऊर्वौर्न्यसेत् ॥ २ ॥ अघोरेइत्यस्यघोरऋ० त्रि० रुद्रो
दे० कूर्मवाहनंदक्षिणवक्त्रंकृष्णवर्णंतेजस्तत्वंत्रिशूलमुद्रारुद्ररूपायनमः हूंबीजंहृदय
न्यासे० ॐहूंअघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तु
रुद्ररूपेभ्यः ॥ १ ॥ अंगुष्ठमध्यमायोगेनहृदयेन्यसेत् ॥ ३ ॥ तत्पुरुषेत्यस्यतत्पु
रुषऋ० गा० सूर्योदे० अश्व० पूर्वं० रक्त० वायु० व्यापकमुद्राचैतन्यात्मनेआ
दित्यायनमः हैं० मुखन्यासे० ॥ ॐ हैंतत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नो
रुद्रःप्रचोदयात् ॥ १ ॥ तर्जन्यंगुष्ठयोगेनमुखे न्य० ॥ ४ ॥ ईशानइत्यस्येशान
ऋ० बृहती० सदाशिवोदे० वृषभ० ऊर्ध्वं० गोक्षीरव० आकाश० ज्ञानमुद्रा
ईशानायाव्यक्तायसर्वव्यापकायनमः हौं० शिरोन्या० ॥ ॐ हौंईशानःसर्वविद्याना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेऽस्तुसदाशिवोम् ॥१॥ लिं
गमुद्रयाशिरसिन्यसेत् ॥ ५ ॥ इतिपंचब्रह्मन्यासः ॥ १० ॥ एतेषांपंचवक्त्राणांव
र्णादिकंस्मृत्वाकलान्यसेत् ॥ ॐ ऋद्ध्यैनमः॥सिद्ध्यैनमः॥ धृत्यैनमः॥ लक्ष्म्यैनमः
॥ मेधायैनमः ॥ कांत्यैनमः ॥ स्वधायैनमः ॥ प्रभायैनमः ॥ ८ ॥ कनिष्ठांगुष्ठयोगे
नपादयोर्न्यसेत् ॥ १ ॥ रजसे० ॥ रक्षायै० ॥ रत्यै० ॥ पाल्यायै० ॥ कामायै० ॥
संजीविन्यै० ॥ प्रियायै० ॥ बुद्ध्यै० ॥ क्रियायै० ॥ धात्र्यै० ॥ भ्रामिण्यैनमः ॥
मोहिन्यै० ॥ ज्वरायै० ॥ १३ ॥ अंगुष्ठानामिकायोगेनऊर्वोर्न्यै० ॥ २ ॥ तमसे० ॥
मोहायै० ॥ क्षयायै० ॥ तृष्णायै० ॥ निद्रायै० ॥ मायायै० ॥ भयायै० ॥ जरायै०
॥ ८ ॥ अंगुष्ठमध्यमायोगेनहृदये० ॥ ३ ॥ शांत्यै० ॥ विद्यायै० ॥ प्रतिष्ठायै० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निवृत्त्यै० ॥ ४ ॥ अंगुष्ठतर्जनीयोगेनमुखेन्य० ॥ ४ ॥ शशिन्यै० ॥ अंगदायै० ॥
इष्टायै० ॥ मरिच्यै० ॥ ॐ ज्वालिन्यैनमः ॥ ५ ॥ लिंगमुद्रयाशिरसिन्यसेत् ॥ ६ ॥
इतिपंचब्रह्मकलान्यासः ॥ ११ ॥ ततोहंसंस्मरेत् ॥ हंसहंसेतियोब्रूयाद्धंसोनामस
दाशिवः ॥ एवंन्यासविधिंकृत्स्नंकृत्वासंपुटमारभेत् ॥ जपयज्ञस्यरक्षार्थमात्मनोमं
डपस्यच ॥ ॐ त्रातारमिंद्रमवितारमिंद्रर्ठ०हवेहवेसुहवर्ठ०शूरमिंद्रं ॥ ह्वयामिशक्रं
पुरुहूतमिंद्रर्ठ०स्वस्तिनोमघवाधात्विंद्रः ॥ १ ॥ इति संपुटं कृत्वाप्रा
च्यांदिशि इंद्रायनमः ॥ इत्यंजलिप्रदर्शनम् ॥ एवमग्रेपिज्ञेयं ॥ त्वन्नोअग्नेव
रुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषार्ठ०
सिप्रमुमुग्ध्यस्मत् ॥ १ ॥ आग्नेय्यां ॥ सुगंनःपंथामभयंकृणोतुयस्मिन्नक्षत्रेयमए

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिराजा ॥ यस्मिन्नेनमभ्यषिंचंतदेवास्तदस्याचित्रर्ठंहविषायजाम ॥ १ ॥ दक्षिणे ॥
असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छसात
इत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ १ ॥ निर्ऋत्याम् ॥ तत्त्वायामिब्रह्मणावंदमानस्त
दाशास्तेयजमानोहाविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशर्ठंसमानआयुःप्रमोषीः ॥
॥ १ ॥ प्रतीच्यां ॥ आनोनियुद्भिःशतिनीभिरध्वरंसहास्त्रिणीभिरुपयाहियज्ञं ॥
वायोअस्मिन्सवनेमादयस्वयूयंपातस्वस्तिभिः सदानः ॥ १ ॥ वायव्यां ॥ वयर्ठं
सोमव्रतेतवमनस्तनुषुबिभ्रतः ॥ प्रजावंतःसचेमहि ॥ १ ॥ उत्तरस्याम् ॥ तमी
शानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं ॥ पूषानोयथावेदसामसद्वृधेरक्षि
तापायुरदब्धःस्वस्तये ॥ १ ॥ ईशान्यां ॥ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहू

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तौसजोषाः ॥ यःशर्ठंसतेस्तुवतेधायिपज्रइंद्रज्येष्ठाअस्मांअवंतुदेवाः ॥ १ ॥ ऊर्ध्वं
॥ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्मसप्रथाः ॥ १ ॥ अधः ॥
॥ इतिसंपुटीकरणम् ॥ ॥ एवंसंपुटीकरणंकृत्वारुद्ररूपमात्मानंध्यायेत् ॥ ॥ ध्यानं
यथा ॥ ॥ अथात्मानंरुद्ररूपंध्यायेत्पंचमुखांशिवम् ॥ प्रतिवक्रंत्रिनेत्रंचदशहस्तंद
शायुधम् ॥ कमंडलुंसाक्षसूत्रंबाणशूलधरंहरम् ॥ दंडंडमरुखट्वांगाभयपात्रंपिनाकि
नम् ॥ अष्टासिद्धियुतंसौम्यंसर्वाभरणभूषितम् ॥ नीलग्रीवंशशांकार्धशेखरंस्मितसुं
दरम् ॥ शुद्धस्फटिकसंकाशंनागयज्ञोपवीतिनम् ॥ गजचर्मपरीधानंव्याघ्रचर्मोत्तरी
यकम् ॥ वृषस्कंधसमारूढमुमादेहार्धधारिणम् ॥ दुर्दंतंकपिलजटंशिखामुद्योतकारि
णम् ॥ अमृतेनाप्लुतंहृष्टंदिव्यभोगसमाकुलम् ॥ दैवतैश्चसमायुक्तंसुरासुरैर्नमस्कृतम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाश्वतंसच्चिदानंदंध्रुवमक्षरमव्ययम् ॥ अजातममृतंनित्यं सर्वव्यापिनमीश्वरम् ॥ एवंरुद्रतनुंसर्वेयक्षराक्षसपन्नगाः॥शाकिनीडाकिनीभूतपिशाचाजंभकाग्रहाः॥ज्वलंतं तेप्रपश्यंतिप्रलयानलसन्निभम्॥एवंध्यात्वाद्विजःसम्यकृततोयजनमारभेत्॥एवंश्रीरुद्रंध्यात्वामानसोपचारैर्देवंपूजयित्वायथाशक्तिमूलंजपेत्जपादनंतरंपुनराचमनं प्राणायामंचविधायदक्षिणहस्तेजलंगृहीत्वा गुह्याति गुह्येतिस्ववामभागेदेवस्यदक्षिणहस्तेजलंविसृजेत्॥इत्यभेदोपासनम् ॥ ॥ यदितुभेदेनोपासीततदानींतनंपूजाविधिंसांगंसोपचारंब्रूते ॥ तत्रैवं क्रमः ॥ पूर्वंस्ववामभागेत्रिकोणवृत्तचतुरस्रात्मकंमंडलंचंदनेनकृत्वातदुपरिताम्रादियथोक्तसंभवोचितविहितंकलशंस्थापयित्वा तस्मिन्नन्यपात्रेणोदकपूर्णेनोदकंगृहीत्वाआपोस्मानितिमंत्रेणताः संस्कृत्यकस्मिंश्चित्शुद्धकलशेत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्तीर्थोदकमापूर्यान्यदुदकंवा ॥ तत्कलशस्यरुद्रमंत्रेणशुद्धिमापाद्यास्त्रेण ॥ ततस्तत्क
लशेएवंचिंतयेत् ॥ सदानंदमयंरुद्रंसूर्यमंडलसंस्थितं ॥ अंशेनात्रसमावाह्यअमृतं
सुभगंबलं ॥ जीवनंसर्वदेवानांकलशेस्मिन्निर्तीरयेत् ॥ ततःकलशोपरितदभिमुखीं धे
नुमुद्रांप्रदर्शयेत् ॥ तत्तोयमेकादशवारंमूलमंत्रेणाभिमंत्र्यपुनरस्त्रेणशोधयेत् ॥ अथक
लशोपस्थितान्यपिअन्यपात्राणिअर्घपात्रोदकेनप्रोक्ष्य तानिसर्वाणिमूलमंत्रेणामृतो
दकेनपूरयेत् ॥ मूलमंत्रोत्र नमःशंभवायेति ॥ ६ ॥ तेषुपात्रेषुमानोमहांतमितिमं
त्रंजपेत् ॥ततःशेषमस्त्रेणविशोधयेत् ॥तत्तत्तोयेन यागसंभारान्यथामिलितान्सर्वान्प्रो
क्षयेत् ॥ तेषुसर्वेषुधेनुमुद्रांप्रदर्शयेत् ॥ नमः शंभवायेतिमंत्रेणतान्सर्वानेकादशवा
रमभिमंत्रयेत् ॥ तदेकंपात्रंकरतलेगृहीत्वास्वीयंस्वरूपंश्रीरुद्ररूपमयंध्यात्वास्वम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तकेदशाक्षरमूलमंत्रेणैकादशवारमभिषिंचेत् ॥ ततोगंधपुष्पाक्षतैःस्वात्मानंपूज
येत् ॥ ॐ आत्मनेनमः॥अंतरात्मने० ॥ जीवात्म०॥परमात्म० ॥ ज्ञानात्म० ॥ जग
दात्मनेनमः ॥ इत्येतैर्मंत्रैः ॥ अन्योदकेनहस्तौप्रक्षाल्यततोमंडपमध्ये आत्मनःपुर
स्ताच्चतुरस्रंगोमयादिनासुलिप्तंस्थंडिलंकुर्यात् ॥ तदुपरिपटादौवागंधादिनाष्टदलं
पद्मंचतुरस्रेरेखावृतंकुर्यात् ॥ तदुपरिलिंगंमनसाकल्पयित्वाऽक्षतादिनाकेनाचि
द्यथासंभवद्रव्येणस्थापयेत् ॥ तत्रशंभवायेत्यादिकेनचिद्रुद्रमंत्रेणपीठंकल्पयेत् ॥ अ
र्चनार्हादिकंचप्रोक्षयेत् ॥ ततएकचित्तोभूत्वापीठपूजांसमाचरेत् ॥ प्रथममा
धारशक्तिकमलासनायनमइतिस्वासनंसंपूज्यततःस्वेस्वेस्थानेपुष्पपत्रादिभिः पीठ
देवताःपूजयेत् ॥ ॐ गंगणपतयेनमः ॥ क्षंक्षेत्रपालाय० ॥ दुंदुर्गायै० ॥ संसरस्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्यै० ॥ शिवादिगुरुभ्यो० ॥ अस्मद्गुरुभ्यो० ॥ परमगु० ॥ परमेष्ठिगु० ॥ गंगंगायै० ॥ यंयमुनायै० ॥ द्वारशाखयोः देहल्यै० ॥ द्वारश्रियै० ॥ मध्ये ॥ वास्तुपुरुषाय० ॥ सुवर्णवर्णाय० ॥ सर्वदेवाशयाय० ॥ ऐंह्रींआधारशक्त्यै० ॥ पीठमध्ये ॥ मंडूकाय० ॥ कालाग्निरुद्राय० ॥ कूर्माय० ॥ वराहाय० ॥ अनंताय० ॥ पृथिव्यै० ॥ कंदाय० ॥ अंकुराय० ॥ नालाय० ॥ पद्माय० ॥ पत्रेभ्यो० ॥ केसरेभ्यो० ॥ कर्णिकायै० ॥ सिंहासनाय० ॥ इतिपद्ममध्ये ॥ धर्माय० ॥ ज्ञानाय० ॥ वैराग्याय० ॥ ऐश्वर्याय० ॥ अधर्माय० ॥ अज्ञानाय० ॥ अवैराग्याय० ॥ अनैश्वर्याय० ॥ संसत्वाय चंद्रवर्णाय० ॥ रंरजसेरक्तवर्णाय० ॥ तंतमसेकृष्णवर्णा० ॥ वंवह्निमंडलाय० ॥ अंअर्कमं० ॥ सोममं० ॥ आत्मतत्वाय० ॥ कलातत्त्वा० ॥ विद्यातत्त्वा०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ शिवतत्त्वा० ॥ आत्मने० ॥ अंतरात्मने० ॥ जीवात्म० ॥ परमात्म० ॥ ॐ रुद्राय०
॥ शर्वाय० ॥ पशुपतये० ॥ उग्राय० ॥ अशनाय० ॥ भवाय० ॥ महादेवाय० ॥ ई
शानाय० ॥ वामायै० ॥ ज्येष्ठायै० ॥ रौद्रायै० ॥ काल्यै० ॥ कलविकरिण्यै० ॥
बलप्रमथिन्यै० ॥ सर्वभूतदमन्यै० ॥ पीठमध्ये॥ ॐमनोन्मन्यैनमः ॥ ततःपुष्पाण्यं
जलिनागृहीत्वा ॥ ॐनमोभगवतेसकलगुणात्मशक्तियुक्तायाऽनंताययोगपीठात्मने
नमः ॥ ॥ इतिमंत्रेणपीठोपरिपुष्पांजलिंदद्यात् ॥ ॥ ततस्तदुपरिपात्रंस्थापयित्वा
तस्मिन्लिंगंवाऐश्वरींमूर्तिं स्थापयेत् ॥ ततस्तस्मिन्पीठेधेनुमुद्रांदर्शयित्वा तत्रजग
द्गुरुंश्रीरुद्रमनंतशक्तियुक्तमुमारमणंनित्यंचित्स्वरूपं सदाशिवं श्वेतपर्वतमस्तकाद्वा
सूर्यमंडलाद्वा स्वहृदयांबुजाद्वा मानोमहांतामितिमंत्रेणवानमःशंभवायेत्यनेनवारुद्रमा ॥२९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाह्य स्वललाटे ज्योतीरूपंचिरंध्यात्वा प्रवहमाणयानाड्याप्लुतप्रणवयोगेननमोस्तुनी लग्रीवायेतिमंत्रेणसतिसंभवेसुवर्णादियथाशक्तिधातुरचितां वामृद्दारुपाषाणमयीं वा रेवादिक्षेत्रसंभूतलिंगस्थबाणादिवातदभावेऽक्षतादिमयींवामानसींवा साक्षाद्रुद्रप्रति मांतत्पीठोपरिपूर्वंस्थापितांतास्मिन्देवं आवाहयेत् ॥ प्रजापतितनूद्भूतंसहस्राक्षंशते षुधिः ॥ मन्युंतंशतशीर्षाणंरुद्रमावाहयाम्यहम् ॥ इत्युक्त्वास्वाहूतोभव ॥ १ ॥ सुप्र तिष्ठितोभव ॥ २ ॥ सन्निहितोभव ॥ ३ ॥ सुमुखोभव ॥ ४ ॥ सन्निरुद्धो भव ॥ ५ ॥ सुप्रसन्नोभव ॥ ६ ॥ अमृतीकरणंधेनुमुद्रया कवचेनावगुंठ्यास्त्रं दर्शयेत् ॥ ततोरुद्रमू र्त्तौआगमोक्तांप्राणप्रतिष्ठांकुर्यात् ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयः ऋग्यजुःसामानिच्छं०प्राणशक्तिर्दे० प्राणप्रतिष्ठापनेवि०एवमृष्यादिस्मृत्वायंत्रस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लिंगेमूर्त्तौवाहृदयेवावक्ष्यमाणदेवताः प्रतिष्ठापयेत्क्रमेण ॥ यंत्रेलिंगमूर्तिहृदयेष्वष्टद
लंपद्मंसंचिंत्यतस्मिन्दीपपद्मे प्राणादीन्पंचप्राणापानव्यानोदानसमानाइति ॥ नाग
कूर्मकृकलासदेवदत्तधनंजयाख्यान्हृदयादियथास्थानेषुमनसाप्रतिष्ठाप्य तत्पद्म
कर्णिकायाम् ॥ ॐ आंश्रींह्रींक्लींक्रोंयंरंलंवंशंषंसंहं सः इत्युक्तौतानितत्त्वानिस्वस्थाने
षुप्रातिष्ठितानिचिंतयेत् ॥ ततःकियदंशेनइतिसर्वेंद्रियाणिपृथिव्यप्तेजोवाय्वाकाशगं
धरसरूपस्पर्शशब्दघ्राणरसनचक्षुस्त्वक्श्रोत्रजिह्वांघ्रिपाणिपायूपस्थमनोबुद्ध्यहं
कारचिदानंदवसानंदविसर्गानंदसत्वरजस्तमोगुणादिव्या अन्येप्यणिमाद्यैश्वर्यादय
श्च इहैवमूर्त्तावागत्यसुखंचिरंतिष्ठंतुस्वाहा ॥ इत्येतावत्सबीजवर्णान्प्रतिष्ठाप्यतत्रैव
हंसः इतिपरमात्माख्यंबीजंप्रतिष्ठापयेत्॥ ततोममप्राणः इहमूर्त्तौप्राणत्वेनप्रतिष्ठितो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मूर्तिप्राण इतिचिंतयेत् ॥ ततोममजीवःकिमत्याजीवाशंकयाइहमूर्तौस्थितइतिचिं
त० ॥ एवंहंसप्राणजीवादिप्रतिष्ठितायां मूर्तौयथास्थानेषुएतानिबीजान्युच्चारयन्
हंसादिसर्वप्राणादिप्रातिष्ठितांसांगांसावयवसर्वातिशयगुणोपेतांसुप्रसन्नदृष्टियुतांपुरः
स्थितांमूर्तिंचितयेत् ॥ क्रोंक्रींह्रींश्रींआंॐ इतिप्राणप्रातिष्ठांदशाक्षरमंत्रेणषडंगन्या
संकृत्वा ॥ ततःस्वागतादिनातंमनसाबहुमानपुरःसरमाहृत्यात्मानिसंधाय्यतत्पीठे
समुपवेश्यवक्ष्यमाणमंत्रक्रमेणषोडशोपचारैरर्चयेत् ॥ तेचैव ॥ ॐनमस्तेरुद्रमन्यव
उतोत इषवेनमःनमस्तेअस्तुधन्वनेबाहुभ्यामुततेनमः ॥ १ ॥ आवाहनंसमर्पया
मि ॥ यातेरुद्रशिवा तनूरघोरापापकाशिनी ॥ तयानस्तनुवाशंतमयागिरिशंता
भिचाकशीहि ॥ २ ॥ उपवेशनं ॥ या मिषुंगिरिशंतहस्तेबिभर्ष्यस्तवे ॥ शिवांगि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रित्रतांकुरुमाहिꣳसीःपुरुषंजगत् ॥ ३ ॥ कटिसूत्रं ॥ शिवेनवचसात्वागिरिशाच्छाव
दामसि ॥ यथानःसर्वमिज्जगदयक्ष्मꣳसुमनाअसत् ॥ ४ ॥ वासः ॥ अध्यवोचद
धिवक्ताप्रथमोदैव्योभिषक् ॥ अहीꣳश्चसर्वान्जंभयन्सर्वाश्चयातुधान्यः ॥ ५ ॥ अधि
वासः ॥ असौयस्ताम्रोअरुणउतबभ्रुःसुमंगलः ॥ येचेमाꣳरुद्राअभितोदिक्षुश्रिताः
सहस्रशोवैषाꣳहेडईमहे ॥ ६ ॥ देवतान्या० ॥ असौयोवसर्पतिनीलग्रीवोविलो
हितः ॥ उतैनंगोपाअदृशन्नदृशन्नुदहार्यः ॥ उतैनंविश्वाभूतानिसदृष्टोमृडयातिनः
॥ ७ ॥ उपसर्पणं ॥ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेअस्यसत्वानो
ऽहंतेभ्योकरन्नमः ॥ ८ ॥ तीर्थोदकेनशंखमापूर्यतत्रगंधपुष्पाक्षताः प्रक्षिप्यार्घ्यं
दद्यात् ॥ गायत्र्याचमनं त्र्यंबकंयजामहइत्यनेनशंभोःस्नानं ॥ पंचामृतैः पृथक्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्नानं ॥ ॐपयः पृथिव्यांपयऽओषधीषुपयोदिव्यंतरिक्षेपयोधाः ॥ पयस्वतीःप्रदिशः संतुमह्यं ॥१॥ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्प्रण आयूंषितारिषत् ॥ २ ॥ ॐघृतंघृतपावानः पिबतव्वसांवसापावानःपिबतांतरिक्ष स्यहविरसिस्वाहा ॥ दिशःप्रदिशआदिशोविदिशउद्दिशोदिग्भ्यःस्वाहा ॥ ३ ॥ मधु व्वाताऋतायतेमधुक्षरंतिसिंधवः॥ माध्वीर्नः संत्वोषधीः ॥ मधुनक्तमुतोषसोमधुम त्पार्थिवंरजः॥ मधुद्यौरस्तुनःपिता॥ मधुमान्नोवनस्पतिर्मधुमाँअस्तुसूर्यः ॥ मा ध्वीर्गावोभवंतुनः॥ ४ ॥ अपांरसमुद्वयसंसूर्येसंतंसमाहितम् ॥ अपांरसस्य योरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिंद्रायत्वा जु ष्टतमम् ॥५॥ एभिः पंचामृतस्नानम् ॥ देवस्यत्वेतिपुनर्वारिणास्नानम्॥ पुनर्नमस्ते इ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्यादिभिरष्टमंत्रैः शुद्धोदकस्नानम्॥ आचमनम्॥प्रमुंचधन्वनस्त्वमुभयोरार्त्नियोर्ज्यां॥
याश्चतेहस्तइषवः परातभगवोवप ॥९॥ कौपीनम्॥ विज्यंधनुः कपर्दिनोविशल्योबा
णवाँ२उत ॥ अनेशन्नस्यया ऽइषवआभुरस्यनिषंगधिः॥ १०॥ कपर्दिकाबंधनम्॥याते
हेतिर्मीढुष्टमहस्तेबभूवतेधनुः॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ ११॥ परिते
धन्वनोहेतिरस्मान्वृणक्तुविश्वतः॥ अथोयइषुधिस्तवारे ऽअस्मन्निधेहितम् ॥ १२ ॥
अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे॥निशीर्यशल्यानाम्मुखाशिवोनः सुमनाभव॥ १३॥
नमस्तआयुधायानातताय धृष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यांतवधन्वने ॥ १४ ॥
इत्यस्त्रसमर्पणम् ॥ मानोमहांतमुतमानोअर्भकंमान ऽउक्षंतमुतमान ऽ उक्षितम् ॥ मा
नोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः॥ १५ ॥ मानस्तोकेतनयेमान ऽ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आयुषिमानोगोषुमानोऽश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामितोवधीर्हविष्मंतःसदमि
त्वाहवामहे ॥ १६ ॥ द्वाभ्यांदेवमावाह्य ॥ असंख्याता० ॥ इत्यनेनसिंहासनोपरिस्था
पयेत् ॥ ॐआगच्छभगवन्देवस्थानेचात्रस्थिरोभव ॥ यावत्पूजासमाप्येततावत्त्वंस
न्निधौभव ॥ ततोदशाक्षरंमंत्रंन्यसेद्देवस्यमस्तके ॥ नमोहिरण्यबाहवेसेनान्येदिशां
चपतयेनमः ॥ १ ॥ वस्त्रं॥आचमनं ॥ नमःशंभवायचमयोभवायचनमः ॥ १ ॥ भूषणं॥
नमोधृष्णवेचप्रमृशायचनमः ॥ १ ॥ उत्तरीयं ॥ किरिकेभ्योदेवानाꣳहृदयेभ्योनमः
॥ १ ॥ उपवीतं ॥ आचमनं॥सुगंधाभ्यंगं ॥ नमःश्वभ्यःश्वपतिभ्यश्चवोनमोनमः ॥ १ ॥
गंधं ॥ अक्षतान् ॥ नमः पार्यायचवार्यायच ॥ १ ॥ पुष्पाणिबिल्वपत्राणि ॥ नमःकप
र्दिनेचव्युप्तकेशायच ॥ १ ॥ धूपं ॥ नमऽआशवेचाजिरायचनमः ॥ १ ॥ दीपं ॥ नमो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बभ्लुशायविव्याधिनेन्नानांपतयेनमः ॥ १ ॥ नैवेद्यं ॥ आचमनं ॥ नमःपर्णायचपर्णश
दायचनमः ॥ १ ॥ तांबूलं ॥ दक्षिणा ॥ तेजोसीत्यनेनारार्तिकम् ॥ एषतेरुद्रभागः
सहस्वस्त्रांबिकयातंजुषस्वस्वाहैषतेरुद्रभागःआखुस्तेपशुः ॥ १ ॥ प्रदक्षिणानमस्का
राः ॥ एवमुपचारपूजांकृत्वारुद्रवामभागेशक्तिंपूजयेत् ॥ दशाक्षरमंत्रमुच्चार्य ॐ रुद्र
शक्त्यैनमइतिगंधादिनार्चयेत् ॥अथैकादशरुद्रांस्तान्रुद्रस्यांगेषुपूजयेत् ॥ तथाश
क्तीःस्वशक्त्यंगेपादतोमस्तकावधि॥ॐअघोरायनमःयाम्यपादे॥१ ॥पशुपतयेन० ॥
उत्तरपादे ॥ २ ॥ शर्वाय० ॥ विरूपाय०॥ दक्षिणोत्तरजानुनोः॥४॥ विश्वरूपाय० ॥
त्र्यंबकाय० ॥ कट्योः ॥ ६ ॥ कपर्दिने० ॥ श्रीभैरवाय० ॥ हस्तयोः ॥ ८ ॥ शूलपाण
ये० ॥ ईशानाय० ॥ अंसयोः ॥ १० ॥ महेशायनमोमूर्ध्नि ॥ ११ ॥ तद्वच्छक्तिंसमर्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येत् ॥ ॐ नमोभगवत्यै ॥ १ ॥ उमादेव्यै० ॥ २ ॥ शंकरप्रियायै० ॥ ३ ॥ पार्वत्यै० ॥ ४ ॥ गौर्यैनमः ॥ ५ ॥ काल्यै० ॥ ६ ॥ कालिंद्यै० ॥ ७ ॥ कोटर्यै० ॥ ८ ॥ विश्वंभर्यै० ॥ ९ ॥ ह्रांह्रींगंगायै० ॥ १० ॥ ॐ शिवशक्त्यैनमः मूर्ध्नि ॥ ११ ॥ ततःपंचवक्त्राण्यर्चयेत् ॥ आद्यंसद्योमुखं ॥ १ ॥ द्वितीयंवामदेवाख्यं ॥ २ ॥ तृतीयमघोराख्यं ॥ ३ ॥ चतुर्थंतत्पुरुषं ॥ ४ ॥ ईशानंपंचमंमुखं ॥ ५ ॥ एतेषामार्षादिकंतुन्यासविधौउक्तं ॥ ध्यानंचोच्यते ॥ वेदाक्षमालाभयवरदकरंस्फटिकशुद्धधवलंचतुर्भुजंसद्योजातवक्त्रम् ॥ ॐ प्रालेयामलबिंदुकुंदधवलंगोक्षीरफेनप्रभंभस्माभ्यंगमनंगदेहदहनज्वालावलीलोचनम् ॥ ब्रह्मेंद्रादिमरुद्गणैःस्तुतिपरैरभ्यर्चितंयोगिभिर्वंदेहंसकलंकलंकरहितंस्थाणोर्मुखंपश्चिमम् ॥ १ ॥ इतिहंसवाहनंपश्चिमवक्त्रंकपिलवर्णंपृथिवीतत्वंबाणमुद्राब्रह्म

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रूपायनमोहां ॥ २ ॥ मध्यमातर्जनीमुक्त्वाबाणमुद्राप्रकीर्तिता ॥ ॐ सद्योजातं० ॥ १ ॥
इत्युक्त्वा ॥ ॐ सद्योजातायपश्चिमवक्त्रायनमः ॥ इतिश्वेताक्षतैःश्वेतपुष्पैर्हंसवाहनं
पूजयेत् ॥ पश्चिमभागेसद्योजाताख्यंप्रथमवक्त्रम् ॥ १ ॥ परश्वक्षमालाभयवरदकरंकुं
कुमलोहितंचतुर्भुजंवामदेववक्त्रम् ॥ गौरंकुंकुमपिंजरंसुतिलकंव्यापांडुगंडस्थलंभ्रू
विक्षेपकटाक्षवीक्षणलसत्संसिक्तकर्णोत्पलम् ॥ स्निग्धंबिंबफलाधरंप्रहासितंनीलाल
कालंकृतंवंदेपूर्णशशांकमंडलनिभंवक्त्रंहरस्योत्तरम् ॥ २ ॥ गरुडवाहनमुत्तरवक्त्रंसिंदू
रवर्णमापस्तत्वंपद्ममुद्राश्रीविष्णुरूपायनमोह्रीं ॥ हस्ताभ्यामंजलिंकृत्वामध्येंगुष्ठद्वयं
पुनः ॥ विधायकर्णिकाकारंपद्ममुद्रामुनाभवेत् ॥ वाममद्येत्यादिकंडिकांतेॐवामदेवा
यनमइत्युक्त्वार्चयेत् ॥ वामदेवाख्यंद्वितीयवक्त्रमुत्तरभागेतुलसीशतपत्रपुष्पादिभिः २

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अक्षमालावेदपाशडमर्वंकुशखट्वांगशूलकपालकरंमहत्कज्जलाभं दंष्ट्राकरालमष्टभुज
म् ॥ कालाभ्रभ्रमरांजनाचलनिभंव्यावृत्तपिंगेक्षणंबाणेंदुद्युतिनिःसृतांशुदशनंप्रोद्भि
न्नदंष्ट्रांकुरम् ॥ सर्पप्रोतकपालशुक्तिशकलव्याकीर्णसच्छेखरंवंदेदक्षिणमीश्वरस्यकु
टिलंभ्रूभंगरौद्रंमुखम्॥ ३ ॥ कूर्मवाहनंदक्षिणवक्त्रंकृष्णवर्णतेजस्तत्वंत्रिशूलमुद्राॐ
रुद्ररूपायनमोहूं॥ मुद्रात्रिशूलनाम्न्यूर्ध्वंतर्जन्याद्यंगुलित्रयम्॥यातेरुद्रशिवातनूरघो
रेत्यादिकंडिकांते ॐअघोरायनमइत्युक्त्वाअघोराख्यंतृतीयदक्षिणभागेऽर्चयेत् ॥नी
लोत्पलकरवीरपुष्पादिभिः॥३॥ अभयकुठारवेदवरदायकंसुवर्णवर्णंचतुर्भुजम् ॥ सं
वर्त्ताग्नितडित्प्रतप्तकनकप्रस्पर्द्धितेजोरुणंगंभीरास्मितनिःसृतांशुदशनप्रोद्भासिताम्रा
धरम् ॥ अर्द्धेंदुद्युतिलोलपिंगलजटाभारप्रबद्धोरगंवंदेसिद्धसुरासुरेंद्रनमितंपूर्वंमुखं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शूलिनः॥ ४ ॥ अश्ववाहनंपूर्ववक्त्रंरक्तवर्णंवायुतत्वंव्यापकमुद्राॐचैतन्यात्मने आदि
त्यायनमःहैं ॥ व्यापिकामुद्रिकासेयमूर्ध्वंहस्तेद्वयेकृते ॥ ॐतत्पुरुषायनमइत्युक्त्वात
त्पुरुषाख्यंचतुर्थंपूर्ववक्त्रंप्राच्यांदिशिदूर्वांकुरार्कपुष्पादिभिःपूजयेत्॥४॥ वरदाक्षमा
लावेदडमरुपाशांकुशशिरःशूलखट्वांगाभयहस्तं प्रसन्नमौक्तिकप्रभाभासुरं दशभुजम्
व्यक्ताव्यक्तगुणोत्तरंसुवदनंषड्विंशतत्वाधिकं ॥ तस्मादुत्तरतत्वमक्षयमितिध्येयंसदा
योगिभिः ॥ वंदेतामसवर्जितेनमनसासूक्ष्मातिसूक्ष्मंपरंशांतंपंचममीश्वरस्यवदनंखं
व्याप्यतेजोमयम् ॥ वृषभवाहनमूर्ध्ववक्त्रंगोक्षीरवर्णमाकाशतत्त्वं ज्ञानमुद्राईशाना
याव्यक्तायसर्वव्यापकायनमः हौं॥ वामहस्तमधःकृत्वातस्योपरिचदक्षिणम् ॥ अंगुष्ठ
तर्जनीमुक्तमुष्ट्याभाज्ञानमुद्रया॥तमीशानमिति कंडिकांते ॐईशानायनमइत्युक्त्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऊर्ध्वमुखंपंचमंमध्यतोर्चयेत् बिल्वपत्रकनकपुष्पादिभिः ॥ ५ ॥ अथतेषांपंचव क्त्राणांवामभागेक्रमेणपंचशक्तीश्चपूजयेत् ॥ ॐपार्वत्यैनमः ॥ १ ॥ गौर्य्यै० ॥ २ ॥ कालिंद्यै० ॥ ३ ॥ कोटर्य्यै० ॥ ४ ॥ विश्वधारिण्यैनमः ॥ ५ ॥ इतिनाममंत्रैश्चंद नादिभिःपूजयेत् ॥ इतिगंधादिनैवेद्यांतंसंपूज्याऽऽवरणपूजनंकुर्यात् ॥ पूर्वंयथाश क्तिमूलेनदुग्धादिभिः संतर्प्यपुष्पांजलिंगृहीत्वा ॥ ॐपूर्णानंदमयोदेवपरामृतरसाप्रि य ॥ अनुज्ञांदेहिमेदेवपरिवारार्चनायभोः॥ इतिपुष्पांजलिपुरःसरमनुज्ञांलब्ध्वा॥अ क्षतदुग्धबिंदुनाउक्तक्रमेणआवरणदेवताः पूजयेत् ॥ तद्यथा॥दशाक्षरेणलिंगोपरिपु ष्पांजलित्रयंदत्त्वाश्रीशिवस्यपादुकां पूजयामिनमस्तर्पयामिनमः इतिमध्येसंपूज्य पूर्वादिक्रमेणपूजयेत् ॥ ॐअनंतायनमः श्रीशिवस्यपादुकांपूजयामिनमस्तर्पया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिनमः ॥ एवंसर्वत्र ॐसूक्ष्माय० ॥ श्रीशि० ॥ शिवोत्तमाय० ॥ एकनेत्राय० ॥
एकरुद्राय०॥त्रिमूर्त्तये०॥ श्रीकंठाय०॥ ॐशिखंडिनेनमः श्रीशिवस्यपा०॥एताःप्रथ
मावरणदेवताःसांगाःसायुधाःसवाहनाःसालंकाराःसशक्तिकाःपूजिताःसंतु ॥ इति
गंधादिनैवेद्यांतं समर्प्यअभीष्टसिद्धिंमेदेहिशंकरसुरपूजित ॥ भक्त्यासमर्पितंतुभ्यंप्र
थमावरणार्चनं ॥ इतिपुष्पांजलिंसमर्प्यलिंगमुद्रांसमर्पयेत् ॥ ऊर्ध्वंदक्षिणमंगुष्ठंमध्यं
चांगुलिवेष्टितम् ॥ कृत्वैवंलिंगमुद्रास्याच्छिवसांनिध्यकारिणी ॥ इतिप्रथमावरणम् ॥
॥ १ ॥ पुनर्दशाक्षरेणपुष्पांजलींस्त्रिर्दत्वा ॥ ॐ ब्रह्माण्यैनमः श्रीशिवस्यपा० ॥ माहेश्व
र्यै० ॥ कौमार्यै० ॥ वैष्णव्यै० ॥ वाराह्यै० ॥ इंद्राण्यै० ॥ चामुंडायै० ॥ महालक्ष्म्यै
नमः ॥ श्रीशिवस्यपा० ॥ एताद्वितीयावरणदेवताःसां० ॥ इतिगंधा० ॥ अभीष्ट

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिद्धिं० ॥ पुष्पां० ॥ लिंगमुद्रांप्रदर्शयेत् ॥२॥ पुनर्दशाक्षरेणपुष्पां० ॥ त्रिर्दत्त्वा ॐन
मोगणेशायनमः श्रीशिवस्यपादु० ॥ स्कंदाय० ॥ १ ॥ पुष्पदंताय० ॥ कपर्दिने० ॥
॥ २ ॥ नंदिने० ॥ चंडाय० ॥३॥ महाकालाय०॥ भृंगिणे० ॥४॥ वृषभायनमः॥१॥
श्रीशिवस्यपादु० ॥ इत्येतास्तृतीयावरणदेवताः सांगाः सा० ॥ गंधादि०॥अभीष्ट०
॥ लिंगमु०॥३॥ पुनर्दशा० ॥ त्रिर्दत्त्वा ॥ ॐ आदित्यायनमः श्रीशिवस्यपादु० ॥
सोमाय० ॥ भौमाय० ॥ बुधाय० ॥ गुरवे० ॥ शुक्राय० ॥ शनैश्चराय० ॥ राहवे०
॥ केतवेनमः ॥ श्रीशिवस्यपादुकांपू० स्त०॥ एताश्चतुर्थावरणदेवताःसांगाः सा०
॥ गंधादि० ॥ अभीष्ट० ॥ लिंगमु० ॥ ४ ॥ पुनर्दशाक्षरेणपुष्पां० ॥ त्रिर्दत्त्वा ॥ ॐ
इंद्रायसुरेशायवज्रहस्ताय ॥ श्रीशिवस्यपादुकांपू० ॥ तर्पयामिनमः ॥ ॐ अग्नये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेजोधिपतयेशक्तिहस्ताय ॥ श्रीशि० ॥ ॐ यमायपित्रधीशायदंडहस्ताय० ॥ ॐ निर्ऋतयेरक्षोधीशायखड्गहस्ताय० ॥ ॐ वरुणायजलेशायपाशहस्ताय० ॥ ॐ वायवेप्राणनाथायध्वजहस्ताय० ॥ ॐ सोमायगदाहस्तायनक्षत्राधिपतये० ॥ ॐ ईशाय विद्येशायशूलपाणये० ॥ ॐ ब्रह्मणेलोकनाथायपद्महस्ताय० ॥ ॐ अनंतायभूतनाथायचक्रपाणये श्रीशिवस्य पादुकांपूजयामिनमस्तर्पयामिनमः ॥ एताः पंचमावरणदेवताः सांगाः सायुधाः सवाहनाः सालंकाराः सशक्तिकाःपूजिताःसंतु ॥ इतिगंधादिनैवेद्यांतंसमर्प्य ॥ अभीष्टसि० ॥ पंचमावरणार्चनं ॥ इतिपुष्पांजलिंसमर्प्यलिंगमुद्रांदर्शयेत् ॥ ५ ॥ इत्यावरणपूजनंकृत्वाऽष्टोत्तरशतनामभिर्बिल्वदलानिसमर्पयेत् ॥ तेयथा ॥ ॐ शिवायनमः ॥ १ ॥ महेश्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राय० ॥ शंभवे० ॥ पिनाकिने० ॥ शशिशेखराय० ॥ वामदेवाय० ॥ विरूपाक्षाय० ॥ कपर्द्दिने० ॥ नीललोहिताय० ॥ शंकराय० ॥ १० ॥ शूलपाणये० ॥ खट्वांगिने० ॥ विष्णुवल्लभाय० ॥ शिपिविष्टाय० ॥ अंबिकानाथाय० ॥ श्रीकंठाय० ॥ भक्तवत्सलाय० ॥ भवाय० ॥ शर्वाय० ॥ त्रिलोकेशाय० ॥ २० ॥ शितिकंठाय० ॥ शिवाप्रियाय० ॥ उग्राय० ॥ कपालिने० ॥ कामारये० ॥ अंधकारसुरसूदनाय० ॥ गंगाधराय० ॥ ललाटाक्षाय० ॥ कालकालाय० ॥ कृपानिधये० ॥ ३० ॥ भीमाय० ॥ परशुहस्ताय० ॥ मृगपाणये० ॥ जटाधराय० ॥ कैलासवासिने० ॥ कवचिने० ॥ कठोराय० ॥ त्रिपुरांतकाय० ॥ वृषांकाय० ॥ वृषभारूढाय० ॥ ४० ॥ भस्मोद्धूलितविग्रहाय० ॥ सामप्रियाय० ॥ स्वरमयाय० ॥ त्रयीमूर्त्तये० ॥ अनीश्वराय० ॥ सर्वज्ञाय० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परमात्मने० ॥ सोमसूर्याग्निलोचनाय० ॥ हविषे० ॥ यज्ञमयाय० ॥ ५० ॥ सोमाय० ॥ पंचवक्त्राय० ॥ सदाशिवाय० ॥विश्वेश्वराय० ॥वीरभद्राय० ॥ गणनाथाय०॥ प्रजापतये० ॥ हिरण्यरेतसे० ॥ दुर्द्धर्षाय० ॥ गिरिशाय० ॥ ६० ॥ गिरीशाय० ॥ अनघाय० ॥ भुजंगभूषणाय० ॥ भर्गाय० ॥ गिरिधन्वने० ॥ गिरिप्रियाय० ॥ कृत्तिवाससे० ॥ पुरारातये० ॥ भगवते० ॥ प्रमथाधिपाय० ॥ ७० ॥ मृत्युंजयाय०॥ सूक्ष्मतनवे० ॥ जगद्व्यापिने० ॥ जगद्गुरवे० ॥ व्योमकेशाय० ॥ महासेनजनकाय० ॥ चारुविक्रमाय० ॥ रुद्राय० ॥ भूतपतये० ॥ स्थाणवे० ॥८० ॥ अहिर्बुध्न्याय० ॥ दिगंबराय० ॥ अष्टमूर्तये० ॥ अनेकात्मने० ॥सात्विकाय० ॥ शुद्धविग्रहाय०॥ शाश्वताय० ॥ खंडपरशवे० ॥ अजाय० ॥पाशविमोचनाय० ॥ ९० ॥ मृडाय० ॥पशु

॥३८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पतये ०॥देवाय०॥महादेवाय०॥अव्ययाय० ॥ हरये० ॥ पूषदंतभिदे० ॥ अव्यक्ताय०॥ दक्षाध्वरहराय० ॥हराय॥ १००॥ भगनेत्रभिदे०॥अव्यग्राय०॥ सहस्राक्षाय०॥ सहस्रपदे० ॥ अपवर्गप्रदाय० ॥ अनंताय० ॥ तारकाय०॥ परमेश्वराय ॥१०८॥एवं बिल्वपत्राणिसमर्प्य ॥ ततःश्रीशिवंपुष्पांजलिपूर्वकंनमस्कृत्यगंधेनघंटांसंपूज्यवामकरेधृत्वानीचैर्धूपयन्वनस्पत्युद्भवेतिमंत्रेणमूलयुक्तेनसमर्पयेत् ॥ ततोदीपमुच्चैःसुप्रकाशमयेतिमंत्रेणमूलयुक्तेनसमर्पयेत् ॥ दशाक्षरेणनैवेद्यंसर्वैरेतैःपरिवृतायश्रीरुद्रायसांगायसशक्तयेनैवेद्यं परिकल्पयामि ॥ इतिनैवेद्यंदत्त्वाप्राणादिमुद्रांप्रदर्श्यमूलेन मध्येपानीयंजवनिकांमध्येधृत्वायावत्भोजनतृप्तिपर्यंतंमूलमंत्रंस्मरेत् मूलमंत्रंदशाक्षरं ॥ ततआचमनं ॥ सुगंधिमिश्रतांबूलंदक्षिणांचदत्त्वाकर्पूरादिनाआरार्तिकंकु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्पात् ॥ दशाक्षरेण पुष्पांजलिंदत्त्वामूलेनचछत्रचामरपरिमलपुष्पाणिआदर्शदर्शनं
समर्पयेत् ॥ ततोरुद्रस्तोत्रेणरुद्रंस्तुवीत ॥ ॐनमोविरिंचिविष्णवीशभेदेनपरमात्मने
॥ सर्गसंस्थितिसंहारव्यावृतव्यक्तमूर्तये ॥ १ ॥ नमश्चतुर्घासोद्भूतभूतभीतात्मनो
भुवः ॥ भूरिभारार्तिसंहर्त्रेभूतनाथायशूलिने ॥ २ ॥ विश्वग्रासायविकसत्कालकूटवि
षाशिने ॥ तत्कलंकांकितग्रीवनीलकंठायतेनमः ॥ ३ ॥ नमोललाटनयनेप्रोल्लसत्कृ
षणवर्त्मने ॥ ध्वस्तस्मरनिरस्ताधियोगिध्यातायशंभवे ॥४॥ नमोदेहार्द्धकांतायदग्ध
दक्षाध्वरायच ॥ चतुर्वर्गेष्टधिष्ठार्थदायिनेमायिनेऽणवे ॥ ५ ॥ स्थूलायमूलभूतायशूल
वारितविद्विषे ॥ कालहंत्रेनमश्चंद्रखंडमंडितमौलये ॥ ६ ॥ दिग्वाससेकपर्दांतभ्रांता
हिसरिदिंदवे ॥ देवदैत्योरगेंद्रादिमौलिघृष्टांघ्रयेनमः ॥७॥ भस्माभ्यक्तायभक्तायभुक्ति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुक्तिप्रदायिने॥सकृद्व्यक्तस्वरूपायशंकरायनमोनमः॥८॥ नमोंधकांतकरिपवेऽसुरद्वि
षेनमोस्तुतेद्विरदवरावभेदिने ॥ विषोल्लसत्फणिकुलबद्धमूर्त्तयेनमःसदावृषवरवाहना
यते ॥९॥ वियन्मरुद्धुतवहवायुकुंभिनीमखेश्वरव्यमृतमयूखमूर्त्तये ॥नमःसदानरकभ
यावभेदिनेभवेहनोभवभयभंगकृद्विभो ॥ १० ॥ एवमाद्यागमोक्तयथामतिस्तुत्यादेवं
प्रदक्षिणीकृत्यतत्पदद्वंद्वंप्रणम्य तत्पीठादीशानदिग्देशेतत्तोयकृतेमंडलेरुद्रनैवेद्यां
शंकिंचिदल्पंगृहीत्वाचंडेश्वरायाशिवनैवेद्यभागंददामिइत्युक्त्वाप्रक्षिपेत् ॥ ततआ
चम्य ॥ लेह्यपेयान्नपानानितांबूलंस्त्रग्विलेपनम् ॥ नैर्माल्यंभोजनंतुभ्यंदत्तमस्तुशि
वाज्ञया ॥ १ ॥ यत्किंचित्क्रियतेदेवमयाचंडतवाज्ञया ॥ न्यूनाधिकंकृतंमोहात्परि
पूर्णंतदस्तुमे ॥ २ ॥ एवंचंडंसंपूज्यरुद्रजपंकुर्यात् ॥ अथास्यजपविधिः ॥ उक्तंच ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनःसंवरणंशौचंमौनंमंत्रार्थचिंतनम्‌ ॥ अव्यग्रत्वमनिर्वेदोजपसंपत्तिहेतवइति ॥ स्वरोवर्णोक्षरंमात्रातत्प्रयोगोर्थएवच॥ मंत्रंजिज्ञासमानेनवेदितव्यंपदेपद इति ॥ सांगमाद्यंजपेद्रूपंकेवलानिनवांतरे॥सांगंसशीर्षंचांत्यंतुनिरंगमितिकेचनेति॥ षडंगानि जपेत्पूर्वमध्यायंरुद्रियंततः ॥ तदंतेजपतेऽष्टर्चंवयंसोममहच्छिरः ॥ अस्यार्थः ॥ सांगमाद्यंरूपंअंत्यंतुसाशिरःसांगंनिरंगंवाऽन्यानिनवकेवलानीति ॥ जपस्योदाहरणं॥ यज्जाग्रत० ॥ ६ ॥ हृदयं ॥ सहस्रशीर्षा० ॥ १६ ॥ शिरः ॥ अद्भ्यःसंभृत० ॥ ६ ॥ शिखा ॥ आशुःशिशानः० ॥ १७ ॥ कवचं ॥ विभ्राड्बृहत्० ॥ १६ ॥ नेत्रं ॥ नमस्तेरुद्र० ॥ १६ ॥ अस्त्रं ॥ इत्यंगानि ॥ पुनर्नमस्तेरुद्र० ॥ ६६ ॥ क्रमेणचमकानुवाकावाजश्च० ॥ ४ ॥ इत्याद्यं ॥ १ ॥ नमस्तेरुद्र० ॥ ६६ ॥सत्यंचमे० ॥ ४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२ ॥ नमस्ते० ६६ ॥ ऊर्क्चमे० ॥ ४ ॥ ३ ॥ नमस्ते० ॥ ६६ ॥ अश्माचमे० ॥
॥ ३ ॥ ४ ॥ नमस्ते० ॥ ६६ ॥ अग्निश्चमे० ॥ ३ ॥ ५ ॥ नमस्ते० ॥ ६६ ॥ अꣳशुश्च०
॥ ३ ॥ ६ ॥ नमस्ते० ॥ ६६ ॥ अग्निश्चमेघर्म० ॥ २ ॥ ७ ॥ नमस्ते० ॥ ६६ ॥ एका
चमे० ॥ १ ॥ ८ ॥ नमस्ते० ॥ ६६ ॥ चतस्रश्चमे० ॥ १ ॥ ९ ॥ नमस्ते० ॥ ६६ ॥ अ
विश्चमे० ॥ २ ॥ १० ॥ इतिकेवलानिनव ॥ ९ ॥ नमस्ते० ॥ ६६ ॥ वाजायस्वाहा०
॥ २ ॥ २९ ॥ वयꣳसोम० ॥ ८ ॥ ११ ॥ इत्यंतंनिरंगं ॥ एवमेकादशावर्तनैरूपंभवति ॥
॥ १ ॥ एतस्यैकादशावर्तनेनरुद्रोभवति ॥ २ ॥ एतस्यैकादशावर्तनेनलघुरुद्रोभवति ॥ ३ ॥
एतस्यैकाद० ॥ महारुद्रोभ० ॥ ४ ॥ एतस्यैकाद० ॥ अतिरुद्रोभ० ॥ ५ ॥ रूपं ॥ १ ॥ रुद्रः
॥ २ ॥ लघुरुद्रः ॥ ३ ॥ महारुद्रः ॥ ४ ॥ अतिरुद्रः ॥ ५ ॥ एवंरुद्रःपंचविधःस्मृतः ॥ एवमेते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षांरुद्राणांमध्येयस्यरुद्रस्ययावद्भिर्ब्राह्मणैर्यावद्भिर्दिनैः पूर्वंसंकल्पः कृतस्तावत्पर्यंत मुक्तप्रकारेणाक्षारलवणाशनाधःशयनादिनियमैर्जपंकुर्यात् ॥ समाप्तेचजपेमूलोक्तप्रकारेणहोमादिकंकुर्यात् ॥ अभिषेकेतु शिवस्यमूर्ध्निहिरण्यकलशेनसंततधारां निषिंचेत् ॥ मधुनासर्पिषापयसावेक्षुरसेननारिकेलेनवाऽऽम्ररसेनवाकदलीभवेनरसेनशुद्धोदकेनवा ॥ पूर्वोक्तपूजादिकंकृत्वाऽभिषेकः कर्त्तव्यः ॥ अभिषेकेजपोरुद्रजपः सचपंचविधः प्रदर्शितइति ॥ प्रकृतमनुसरामः ॥ एवंसांगादिसाशिरोंतंजपंकृत्वातदंते ॥ ॐ उग्रश्चेतिसप्तजटाइतिकेचित् ॥ ॥ ऋचंवाचं ॥ २४ ॥ शांतिपाठश्च ॥ एवंकर्तुमशक्तश्चेत्तदादशाक्षरंयथाशक्तिजपेत् ॥ ततइमारुद्रायेतिमंत्रेणार्घपात्रोदकेनशंखोदकेनवाश्रीरुद्रपुरस्ताद्यावत्संख्याकृतंजपंरुद्रायानिवेदयेत् ॥ धर्मार्थ

॥४१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काममोक्षादिस्वेप्सितफलप्राप्त्यर्थंयथाशक्तियत्कृतरूपादिजपेनस्वयंवाऋत्विक्सह
कारितेनवाप्रणतजनानुकंपीसच्चिदानंदरूपः परमात्माश्रीशिवः प्रीयतामित्यु
च्चार्यरुद्रपाणौनिवेदयेत् ॥ ततोदेवाभिमुखःकृतांजलिपुटःसन् ॥ जपन्यासार्चनंदेवय
त्कृतंतुमयाद्यवै ॥ न्यूनातिदोषरहितंकृतंकर्ममयाप्रभो ॥ भवत्वेतत्कृपासिंधोक्षमस्व
चनमोस्तुते ॥ पूजान्यासादिकंदेवकृतंयत्त्वदनुग्रहात् ॥ तेनमत्कर्मणारुद्रप्रीतो
भववरप्रदः ॥ नमःशिवायशांतायसगणायादिहेतवे ॥ निवेदयामिचात्मानंत्वं
गतिःपरमेश्वर ॥ न्यूनातिरिक्तंतत्पूर्णंप्रसादादस्तुशंकर ॥ एतत्कृतेनदेवेशसदामे
वरदोभव ॥ एवंदेवंक्षमाप्यात्मानंनिवेद्यपुष्पांजलिंदत्त्वापुनःस्तुत्वामंत्रहीनं०
आवाहनंन० ॥ साष्टांगंनमस्कृत्यपूर्वंस्थापितकलशादीन्विसर्जयेत् ॥ पुष्पाक्षतंगृही

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वा कलशामृतपूर्णस्त्वं सर्वैर्देवैराधिष्ठितः॥ देवैः सर्वैः समेतस्त्वं स्वस्थानं गच्छ पात्र न ॥१॥ ततोऽर्घपात्रं विसृज्य पीठादिसर्वा इष्टदेवतामूर्त्तौ लीना उपसंहारमुद्रया परिभाव्य पुनस्तं देवं सत्तेजोमयमद्वैतज्ञानानंदघनं विभुं ॥ विकिरुद्रेति मंत्रं जपन् पादुकमुद्रया पीठात्पूर्वानीतमार्गे देवं ध्यायन् स्वहृदयादि पूर्वाहृतस्वालयं नयेत् ॥ एवं स्वहृदये संस्थाप्य पुनर्मानसैरुपचारैरभ्यर्च्य स्वांगेषु पूर्ववद्दशाक्षरमंत्रवर्णान्विन्यस्य दशाक्षरेण प्राणायामत्रयं विपरीतविधिना कृत्वाऽऽत्मानं देवरूपं हृदि संभाव्य तदनु भवत्प्रसात्माजपकर्त्तायजमानः सुखं विहरेत् ॥ अस्मिन्पाणौ धृते ग्रंथे समपेक्षा च कस्यचित् ॥ नैव स्यादिति निश्चित्य स्वीकार्यः कर्मठैरयम् ॥ १ ॥ आसीद्विप्रः सकलधरणीनिर्जराणां वरिष्ठः कालूरामः कमलवदनः सर्वशास्त्रार्थवेदी॥ यज्ञाभ्यासस्खलितदुरितश्चारुलब्धप्रतिष्ठः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रज्ञायुक्तोहरिहरनिभः सर्वदासेवनीयः ॥ २ ॥ गंगाधरस्तस्यजनुर्यविष्ठःस्वधर्मनि
ष्ठोगणराजभक्तः ॥ रुद्राविधानैश्चमकैस्त्वनेनप्रकाशितापद्धतिरीश्वरस्य ॥ १ ॥ का
रिकाबद्धपद्यानिसूत्राण्यालोक्यतत्त्वतः ॥ पंचरुद्रादिभेदैश्चपूजनार्थंकृतामया ॥ २ ॥
इतिश्रीपार्थकव्यासगोलवालगंगाधरविरचितापरशुरामसूत्रानुसारिणी श्रीरुद्रपद्ध
तिःसमाप्ता ॥ ॥ श्रीः ॥ शुभंभवतु ॥ अथसंभाराः ॥ ॥ कुंकुमं १ केसरं २ कस्तूरी
३ कर्पूरः४तंदुलाः५ सिद्धार्थाः ६श्वेतपुष्पाणि७तुलसीपत्राणि ८मोली९पूगफलानि
१० नारिकेलफलानि ११ अन्यफलानि १२ बिल्वपत्राणि १३ यज्ञोपवीतं १४ वस्त्रं
१५ सुगंधाभ्यंगौ १६ दुग्धं १७दधि १८ घृतं १९ मधु २० शर्करा २१ गोमयं २२
करवीरपुष्पाणि २३ कमलं २४ दूर्वांकुराणि २५ अर्कपुष्पाणि २६ कनकपुष्पाणि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२७ कलशः २८ शुद्धजलतीर्थोदकं २९ सर्वौषधयः ३० यवाः ३१ पंचपल्लवाः ३२ दक्षिणा ३३ सूत्रं ३४ पंचरत्नानि ३५ दर्भाः ३६ तांबूलं ३७ बहुपक्कान्ननैवेद्यंपायसंवा ३८ प्रतिमा ३९ इत्यादिसामग्रीसंपादनीया ॥ शुभंभवतु श्रीरस्तु ॥ ॥ छ ॥

एतत्पुस्तकं कल्याणनगर्यां श्रीकृष्णदासतनूजेन गंगाविष्णुना स्वकीये "लक्ष्मीवेंकटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाशितम् ॥ शके १८२३ संवत् १९५७ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नूतन पुस्तकोंकी जाहिरात.

स्मृतिरत्नाकर (धर्मशास्त्रका प्रामाणिकग्रंथ) की० २ रु० बृहत्संहिता-भाषाटीका ग्लेज ४ रुपया. धन्वंतरी-(वैद्यक) भाषाटीका ५ रुपया. बृहद्दैवज्ञरंजन-(संस्कृत) ज्योतिषका पुस्तक देखनेही योग्य नूतन छपा है. की० २॥ रुपया. वैष्णवधर्मरत्नाकर-भाषाटीका बावलीग्राम-निवासी गोपालदासजीने अत्यंत परिश्रमसे बनाया है. की० २॥ रुपया. रामस्तवराज-संस्कृत टीकासह की० ६ आना. विनयपत्रिका-भाषाटीकासहित २॥ रुपया. गीतावली रामायण-भाषाटीका २ रुपया. शतश्लोकीरामायण-संस्कृत टीकेसह की० ४ आना. शतश्लोकि-भाषाटीका (वेदांत) ८ आ. तुलसीकृतरामायण सटीक लवकुश कांडसहित प्रत्येक दोहा चौपाईका अर्थ पंडित-ज्वालाप्रसादजी कृत भाषाटीका अति उत्तम संपूर्ण की० ८ रु. तुलसीकृतरामायण बडे टाईपका अति उत्तम कोष, ३८०० टिप्पणी और संपूर्ण क्षेपक ग्लेज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

की० ५ रु०. पतिव्रतामाहात्म्य और मातापितृसेवामाहात्म्य-भाषाटीका की० १२ आना. पंचतन्त्र-भाषाटीका की २ रु. स्त्रीपुरुषसंजीवन भाषाटीका की० ८ आना. निर्भयविलास भाग ३ अति उत्तम है. की० १। रुपया. तुलसीकृतरामायण उत्तम छोटा गुटका १० आना. सुन्दरकांड भाषा-गोविन्दराजीय भूषण टीकाके अनुकूल बडे टाईपमें छपता है.

श्रीमद्भागवत अन्वितार्थप्रकाशिकाव्याख्यासहित छपता है. प्रथमस्कन्ध, द्वितीयस्कन्ध, तृतीयस्कंध, चतुर्थ, पंचम, षष्ठ, सप्तम, अष्टम और दशमस्कन्ध छप चुके हैं. आगे छपता है शीघ्र तयार होगा. इसका मूल्य अगाऊ रुपया भेजनेवालोंसे १२ रुपये.

पुस्तक मिलनेका ठिकाना- गंगाविष्णु श्रीकृष्णदास,

लक्ष्मीवेङ्कटेश्वर छापाखाना कल्याण-मुंबई.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सविनयं सूच्यते.

बृहदारण्यक आदि उपनिषद श्रीमद्भगवद्गीता तथा वेदान्त शास्त्र, योगशास्त्र तथा महाभारत, भागवत आदि महापुराण इन ग्रंथोंमें जो व्यासादिक मुनियोंने गुह्यरहस्य कथन किया है उसमेंसे भ्रमर जैसे अनेक पुष्पोंसे मधुको ग्रहण कर लेता है वैसेही ग्रंथकर्ताने उत्तमोत्तम सार अर्थको ग्रहण करके उसको निजमतिके अनुसार कवित्त, भजन, पद इत्यादिकमें कथन करके प्रगट किया है तथा उत्तम २ शेर, मिस्रा, तुरट, ठक आदि प्राचीन कवियोंकी वाणीसेभी लेकर लिखे हैं की० १। रु.

समयदीपिका–(अर्थात्) साठ संवत्सरोंका भविष्य.

कीमत ३॥ आना.

समाचरा क.

भावत लौन पर मीठहू " स.

अनेक ग्रन्थ देखेही होंगे परन्तु अब यह भक्त.

चित्त बहलाइये इस ग्रन्थकी कविता जैसी कुछ ब

तो आपके सन्मुख उपस्थितही है । परन्तु क

स्मरण करनेसे चित्त एकाएक भक्तिके अगाध साग.

लगाने लगता है आशा है सच्चे भक्त उस दशाको

अनुभव करेंगे की. १ रु०

पुस्तकें मिलनेका ठिकाना–गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेंकटेश्वर" छापाखाना कल्याण–मुंबई.
KALYAN, G.I.P.RY. JUNCTION.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

K. K. Sharma Gaur

16·1·82

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सविनयं सूच्यते.

संस्कृतादि पुस्तकप्रकाशक– " लक्ष्मीवेङ्कटेश्वर " नाम मुद्रणयन्त्रमें संस्कृत तथा भाषाटीकासहित अनेकानेक ग्रन्थ जैसे–वैदिक, वेदान्त, पुराण, धर्मशास्त्र, काव्य, न्याय, व्याकरण, छन्द, नीति, चम्पू, नाटक, स्तोत्र, वैद्यक, स्मृति, कोष, इतिहास, श्रीरामानुजसाम्प्रदायी तथा हिन्दी भाषाके सब रकम ग्रन्थ सर्वकाल विक्रयको तयार रहते हैं जो अन्यत्र नहीं मिल सके. खुलापत्राकार तथा सपुट रेशमी विलायती चित्रित जिल्द बँधी है. आध आनेका टिकट भेजनेसे बडा सूचीपत्र रवाना होता है.

पुस्तकें मिलनेका ठिकाना–गंगाविष्णु श्रीकृष्णदास,

"लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण–मुंबई.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ इति रुद्रविधानपद्धतिः समाप्ता ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection